ति। प्रुवति। च्यवतीनां वा। एषामभ्यासो ० कारस्येत्वं वा स्यात्स निॐवर्णे परे धात्वक्षर परे। असि स्रवत्। असुस्रवत्। नाग्लोपी तिह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीचकासत्। मलांतरे अचचकासत्। अग्लोपितिसुब्धात्वुप्रकरणे उदाहरिष्यते। ण्यंतां णिच्। पूर्वविप्रतिषेधादयवा इत्वाद्वा वृद्धिं बाधित्वा णिलोपः। चोरयति। णौ चङि ति ह्रस्वः। दीर्घो लघोः। न चाग्लोपित्वाद्धयो रप्य संभवः। ण्याश इति निर्देशात्। अचूचुरत्। णौ च संश्चङोः। सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा स्यात्। संप्रसारणं तदाश्रयं कार्यं च बलवदिति वचनात्। ओदितः संप्रसारणं पूर्वरूपं। अशूशवत्। अलघुलानः दीर्घः। अशिश्वयत्। स्वापेश्चङि। उपसर्गात्सरस्येतः संप्रसारणं स्यात्

अंतरंगत्व धातोः) २

(विषयसप्तमी। अंतरंग (वात्)। उद्यादेः पूर्वं संप्रसारणं संप्रसारणेति परिभाषाभा ०ष्ये प्रत्याख्याता) ३

१ उपसर्गादिति तिनकार्यं १

३ (चङ्परेणौ यत्लघु तत्परो भ्यासो भावात्वलदीर्घः पक्षो) (लघु परो लोपिनं न हि कार्ये निमित्त यानाश्रीयते) ३

षोन स्यात्वङि। असीषुपत्। स्वापेसीषपत्। व्युसीषुहत्। आटिटल्। आशिशत्। बहिरंगोप्युपधा ह्रस्वो द्वित्वात्प्राग्भवन्। औणिऔ दि लकरणा द्विगात्। मा भवानिदिधत्। एज ह्रस्वो धतौ विधीनात्तेह द्विः। मा भवानद्रि दिदुधे। नंद्राइति नदराणां न द्वित्वं औ दिदत्। आदिद्रत्। आचिञ्चिचत्। उब्ज आर्जवे। उपदेशे दकारोपधः। भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपातनाद्यस्य बः। स चान्तरंगोपि द्वित्व विषये नन्द्राइति निषेधादुब्जि शब्दस्य द्वित्वे कृते प्रवर्तते न तु ततः प्राक्। दकारोच्चारणसामर्थ्यात्। औब्जिजत्। अजादेरित्येव। नेह। अदिद्रपत्। रभेरशब्लिटोः। रभेर्नुम्स्यात्। अचिनत्। शब्लिटोः। नमेश्च। अररंभत्। अतत्वंभत्। हेरचङीति सूत्रे अचङीत्युक्तेः कुत्वं न। अजीहयत्। अत्स्मृद्त्वर प्रथम्रदस्तृस्पशां। असस्मरत्। अददरत्। तपरत्वसामर्थ्याद्न लघोर्न दीर्घः। विभा

(नत्वन्नवस्था पी अनिति पक्षे च परत्वं वस्येव। किंच चङीति द्वित्वात् सरला दपि ... नंद्रा इस्य ... स्या धिकारसूत्रे न तत्र धातोरिति स्यात्न स्या ... संज्ञा कोलिकादयेः परासे योगादयो द्विसेन भरे

(स्था महरस्य बन्ध्या प्याप तः अनुबन्ध कत्वा वे स्यात्: अनेण्यन्तस्य सिद्धे वातः पुनरतस्य वचनं) इएन नरम वर्णापमस्य सूत्रे धातु प्याप

॥ ८२ ॥

सि॰ कौ॰

॥८२॥

शर्वेष्टि-चेष्ट्योः । अभ्यासस्य अत्त्वं वा स्यात् चङ्परे णौ । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् । भ्राजभासेत्यादिना वोपधाह्रस्वः । अबिभ्रजत् । अबभ्राजत् इत्यादि । काण्यादीनां वेति वक्तव्यं । ण्यन्ताः कण रण भण श्रण लुप हेठ । कण्या [illegible] अपप्यन्यत्र ईत्थं द्वादश । दयः षड्भाष्ये उक्ताः । ह्वायि वाणि लोटि लोपि चयः श्च त्वा रोधि कान्या से । वौणि लोटि अपप्यन्यत्र ईत्थं द्वादश । अचीकणत् । अचकाणत् । स्वापेश्चङि । ण्यन्तस्य स्वापेश्चङि संप्रसारणं स्यात् । असूषुपत् । शाच्छासाह्वा व्यावेपां युक् । णौ परे । पुकोऽपवादः । शाययति । ह्वाययति । ह्वः संप्रसारणं सन्यङोः [illegible] अभ्यस्तस्य च चङ्परे णौ ह्वः संप्रसारणं । अजूहवत् । अजुहावत् । लोपः पिबतेरीच्चाभ्यासस्य । पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादे

३ (पङ्ग्रहणं [illegible] ङितात् अनुवृत्तेव सिद्धे न हि अस्मात् ङित् संभवति । चङि इति विषयसप्तमी ।)३

२ (अत्र पाशब्देन लुग्विकरणस्य पिबतेरेव ग्रहणमिति कैयटः । पिबतेः लस्य तु न ग्रहणं लाक्षणिकत्वात्) २ (विषयसप्तमी) २

१ (अंतरंगत्वात् चङि उत्त्वे पूर्वं पुक् अतो न बाध्यबाधकभावः । पिबतेः पीप्य इति सुवचं) ४ (णौ लक्षणे [illegible] सिद्धे प्राग [illegible] (मांतरान्तरं [illegible]) वचनं) ४

(संप्रयोजन स्वकार्यः) २

शश्च चङ्परे णौ । अपीप्यत् । अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुक् । अर्पयति । ह्रेपयति । व्लेपयति । रेपयति । क्नोपयति । क्ष्मापयति । स्थापयति । तिष्ठतेरित् । उपधाया इकारादेशः स्याच्चङ्परे णौ । अतिष्ठिपत् ॥ जिघ्रतेर्वा । अजिघ्रिपत् । अजिघ्रपत् । उर्ऋत् । अचिकृतत् । अचिकीर्तत् । अचीकृतत् । अचकर्तत् । अमीमृजत् । अममार्जत् । पातेर्णौ लुग्वक्तव्यः । पुकोऽपवादः । पालयति । वो विधूनने जुक् । वातेर्जुक् स्यात् णौ कंपे । वाजयति । कंपे किं । शीके । न्यापयति । विभाषा लीयतेः । लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने । लीयतेर्लातेश्च क्रमान्नुग्लुकौ वा स्तो णौ स्नेहद्रवे । विलीनयति । विलाययति । विलालयति । विलापयति । घृतं । लीङ् ईकार प्रश्लेषा

(सुगंधीकरे उ्तीलर्थ) ९३

(निपातनं द्रवीकरण) २

३ (अन्वर्थानुरोधात् वातेरेव ग्रहणं न वेजो नापि वैङ इत्यस्य लाक्षणिकत्वात् ।) ४ (न च निरनुबंधकपरिभाषया [illegible] धातुभेदे न रूपभेदस्य सिद्धौ प्रकरणसूत्रे अन्यतरस्यां ग्रहणस्य [illegible] अनुबंधकस्य [illegible] वातेः [illegible]) ३ (एवं [illegible]) ३

(लि [illegible] मतेरिति [illegible]) ३

(एकदेशविकृतन्यायेनेदं चस्याश्रितत्वसूत्रे भाष्ये स्पष्टं।।१।। (णी विषये सामान्येन व्यवस्थापकन्यायाप्रवृत्तिर्ज्ञापनात्।।२

सि॰ कौ॰

।।८३।।

दीर्घः पक्षे नुक्। स्नेहद्रवयति किं। लोहं विलापयति। विलापयति। प्रलम्भनाभिभवपूजासु लियो नित्यमात्व
मिति वाच्यं। लियः संमाननशालीनीकरणयोश्च। णौ इति लियो ण्यन्तयोरात्मनेपदं स्यात्।। अकर्तृगेपि फलेऽपू
जाभिभवयोः प्रलम्भने चार्थो जटाभिरालापयते।। पूजामधिगच्छतीत्यर्थः। श्येनो वर्तिकामु
ल्लापयते। अभिभवतीत्यर्थः। बालमुल्लापयते।। वञ्चयतीत्यर्थः।। विभेतेर्हेतुभये।। बिभेतेश्च आत्वं वास्या
त्। प्रयोजकाद्भयं चेत्।। भीस्म्योर्हेतुभये। आभ्यामात्मनेपदं स्यात् हेतोश्चेद्भयस्मयौ। सूत्रे भयग्र
हणं धात्वर्थोपलक्षणं। मुण्डो भापयते। भियो हेतुभये षुक्। भी ई इती कारः प्रश्लिष्यते। ईकारान्तस्य बि
भेतेः षुक् स्यात् हेतुभये। भीषयते।। नित्यं स्मयतेः।। स्मयतेरेचो नित्यमात्वं स्यात् हेतोः स्मये णौ।।
जटिलो विस्मापयते। हेतोश्चेद्भयस्मयावित्युक्तेर्नेह। कुञ्चिकयैनं भाययति। विस्माययति। कथं तर्हि वि

मे ने ।।८३।।

(प्रत्यये षु णेरणाविति णोरिति वर्तते ण्यन्तात्मनेपदविधिरकर्त्रभिप्रायार्थः।।४।। (भयग्रहणं धात्वर्थोपलक्षणं तदाह।।२

(आत्मनेपदं भी स्मी प्रकृतिकण्यन्तादेवेति नण्यन्तात्णाविति भावः ज्ञालिग्रहणेतु न भाने रूपा वा रुः।२

२

स्मापयन्विस्मितमाननानि इति। मनुष्यवाचेत्यत्र करणादेव हि तत्र स्मयः। अन्यथा शानजपि स्या
त्। सत्यं। विस्मापयन्निति एव पाठ इति साम्प्रदायिकाः। यद्वा मनुष्यरूपयोज्यकर्त्री विस्मापयते तया
हेतो विस्मापयन्निति ण्यन्ताण्णौ शतेति व्याख्येयं। स्फायो वः। णौ। स्फावयति। शदेरगतौ तः। शदेर्णौ
तोऽन्तादेशः स्यान्न तु गतौ। शातयति। गतौ तु गाः शादयति गोविंदः। गमयतीत्यर्थः। रुहः पोऽन्यतरस्यां।
णौ। रोपयति। रोहयति। क्रीङ्जीनां णौ। एषामेच आत्वं स्याण्णौ। क्रापयति। अध्यापयति। जापय
ति। णौ च संश्चङोः। सनि परे चङ्परे णौ इङो गाङ् स्याद्वा। अध्यजीगपत्। अध्यापिपत्। सिध्यतेरपार
लौकिके। ऐहलौकिके अर्थे विद्यमानस्य सिध्यतेरेच आत्वं स्याण्णौ। अन्नं साधयति। निष्पादयतीत्यर्थः।।

विषयसप्तमी।।२

(आर्धधातुकस्येत्यधिकृतस्य विषयसप्तमीत्वेन तत्सामानाधिकरण्यात् णाविन्त्यस्यापि तथात्वं तत्रादेशस्य णिबुद्धिनिमित्तकत्वेपि गाङो द्वित्वे कर्तव्ये
णावचः आदेशो नेति न प्रवर्तते। सनि हि तस्मिन्नजादे द्वितीयस्येति णिचः एव द्वित्वं स्यात् ततश्च न प्रक्रियायां नापि पारनिष्ठिनरूपे वर्णपरत्वमस्तीति कीर्तयति साम्प्रतं तदाह।२

सि॰को॰

२ (विकृतिनिर्देशश्चक आक लाभावात् णाविभु क्तेः पुष्वक्रुत्सेदित्वादिः) २ १ (तायंश्रमनाद्यादिकलात्यकानिर्देशोचकलंनिर्षिद्धं) १

॥९३॥ आकारान्तौ किके किंता॥ घसः सिध्यति। तत्वं निश्चिनोति। तं प्रेरयति। सेधयति तापसं तपः॥ प्रजनेर्वी यतेः॥ अ स्यैचआत्वं वा स्यात् णौ प्रजने र्थे। वापयति। वाययति वा गाः पुरोवातः। गर्भं ग्रायतीत्यर्थः। उंदुपधायागोहः॥ गूहयति। दोषाणी॥ दुष इति सुबन्तं दुष्यतेरुपधाया ऊत्स्याणौ दूषयति। वाचित्त विरागे॥ वि रागोऽप्रीतता॥ चित्तं दूषयति दोषयति वा कामः। मितां ह्रस्वः। भ्वादौ चुरादौ च मितः॥ घटयति। जनी। जनयति। जॄष्। जरयति। जॄष्मते स्त्र जारयति। रंजेर्णौ मृगरमणे न लोपो वाच्यः। मृगरमणमा खेटकं। रजयति। मृगान्। मृगेति किं। रंजयति पक्षिणः। रमणादन्यत्र तु रंजयति मृगान्। तृणदानेन। चु रादिषु ज्ञपादिश्चित्। विस्फुरोरिति वा आत्वं। चपयति चपयति त्युक्तं। चिनोतेस्तु चापयति। स्फार यति। स्फोरयति। अपुस्फरत्। अपुस्फुरत्। उं भौं सो भ्यासे र्यः। साभ्यासस्यानिलः उभोन कारेण ॥९४॥

१ (पूर्वत्रासिद्धीयमद्विर्वचने इत्युक्तेः पूर्वेण लेनासिद्धत्वपि कश्चिद्प्रवर्तति ओँपिनार्थमिदं वोध्यं।) साभ्यासस्येति स्पष्टार्थं उभावित्युक्तेः) १

१ (आलस्यवौक्तत्वेनस्थानियतातस्फारित्स्याद्दलामिति भावः।) १ तेन उणुनावेत्यचणलवत्तुवर्येणाद्दिवं उत्तरस्यणला भावः)

१ (नचलोगामिरितिसूत्रेणा विहितस्य गम्यादेशस्य कारस्येत्वेदुदित इति तुमाव सिरिति वाच्यं। तस्यानुनासिकलेभा नाभावात्तस्य तुतोयमिकानिर्देशः स्या ९ (लेनेति। आगयौरित्यामनेपदं तुल्या थिंकभिन्नेतारवौत भावः) ९

त्वं प्राप्नुतो॥ नि मित्ते सति। प्राणिणत्। णौ गमिरबोधने। इणो गमिः स्याण्णौ। गमयति। बोधने तु प्रत्या ययति। इण्वदिकः। अधिगमयति। हनस्तोचिण्णलोः। हो हंतेर्ञ्णिन्नेषु। घातयति। ईर्ष्यतेस्तृतीयस्ये ति वक्तव्यं। तृतीय व्यंजनस्य तृतीयैकाच इति वार्थः। आद्येषकारस्य द्वित्वं वारयतुमिदं। द्वितीयेत्वजादे र्द्वितीयस्येत्यस्यापवादः तयासन्नंते प्रवर्तते। ऐर्ष्यियत्। ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजंताच्च डि षण्णरएवाभ्यासेश्रूयते हलादिः शेषात्। द्वित्वं तु द्वितीयस्येवत् लीयाभावेन प्रवृत्तवार्तिकाप्रवृत्तेः। निरर्थ प्रेषणाद्वा तोर्हेतुमण्णोश्च अर्थे न तु ल्योर्थः। तेन प्रार्थयंति शयनो थितं प्रियेत्यादि सिद्धं। एवं सक र्मकेषु सर्वेषु ध्येयं॥ इति ण्यंतप्रक्रिया॥ धातोः कर्मणः समानकर्तृकादिच्छायां वा। इषि कर्म ण इषिणैे।

(ननु आत्मनः इत्येव कर्तव्यं तदेव उत्तरत्रानुवर्तते इष्यते तस्य धातोरेका यांवान्वयः तत्रेच्छायो आत्मनः इत्यस्य कर्तृत्वेना न्वयस्य कृत्स्नत्वात् तरंगत्वात्र धातावण्यर्थद्वारकर्तृत्वासंबंधोनैवान्वयः तरत्वत् तथा त्वयसं भवात् भिन्नसंबंधे नैवान्वयः प्रसासस्याचशुभ योरेरकत्व एवैतत् प्रसतिए वैसमानकर्तृकात् इति यर्थं इति कण्ठे स्पष्टं॥ ननु तर्हि तस्यक्रियानिरूपितत्वात् समानकर्त का दित्युक्त्या क्रियावाचकाद्धातोरेव भविष्यतिकिं धातुग्रहणे ने सत्यत्र।) १

१ (धातुत्वात् समानकृतेलंकमेहि च तरपदे वाच्यमिति भावः)

(मिथ्यसक्रमीलेन आत्मेभ्योसमाहि लक्षणेति॥) १

सि॰कौ

२(अत एव इट्को सन्नीति किन्त्वसार्थकं)१(प्रत्यासत्तिमाश्रित्य प्रश्नः प्राग्वदेव।)२

ककर्त्तृका। धातोः सन्प्रत्ययो वा स्यादिच्छायां। धातोर्विधेरिदं सन आर्धधातुकत्वं। सन्यतः। पठितु

॥८५॥

मिच्छतीति पिपठिषति। कर्मणः किं। गमनेनेच्छतीति करणान्मा भूत्। समानकर्तृकात् किं। शिष्याः

पठन्त्वितीच्छति गुरुः। वाग्रहणात्पक्षे वाक्यमपि। लुङ्सनोर्घस्लृ। एकाच उपदेशे इति नेट्। सस्य तत्वं।

अत्तुमिच्छतीति जिघत्सति। इष्यतेस्तृतीयस्येति यिसनो द्वित्वं। इर्ष्यियिषति। इर्ष्यिषिषति। रुदविद

मुषग्रहिस्वपिप्रच्छः संश्च। एभ्यः संश्च क्त्वा च कित्स्तः। रुरुदिषति। विविदिषति। मुमुषिषति॥

सनि ग्रहगुहोश्च। ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात्। ग्रहिज्येति संप्रसारणं। सनः षत्वस्यासि

॥८६॥

द्धत्वाड्ढषभावः। जिघृक्षति। सुषुप्सति। किरश्च पंचभ्यः। कॄगॄदृङ्धृङ्प्रछ एभ्यः सन इड् स्यात्।

२(एकाच इति निषेधप्राप्तेर्वचनं।)२

२(ननु परत्वेन षत्वकत्वयोः कृतयोः भष्भावो न स्यादत आह)२

पिपृछिषति। चिकरिषति। जिगरिषति। जिगलिषति। अत्रेटो दीर्घो नेष्टः। दिदरिषते। दिधरिषते।

कथमुद्दिधीर्षुरिति। भौवादिकयो धृङ्धञो रिति ग्रहणात्। इको झल्। इगन्ताज्झलादिः सन् कि

त्स्यात्। बुभूषति। दीङः। दातुमिच्छति दिदीषते। एज्विषयत्वाभावान्मिनातिमिनोतीत्यात्वं न। अत

एव सनिमीमेति सूत्रे मा धातोः पृथक् मीग्रहणं कृतं। हलन्ताच्च। इकः समीपाद्धलः परो झलादिः

सन् कित्स्यात्। गुह्। जुघुक्षति। बिभित्सति। इकः किं। यियक्षते। झलः किं। विवर्धिषते। हलन्तग्रह

णं जातिपरं। तृह्। तितृक्षति। तितृंहिषति। अज्झनगमां सनि। अजंतानां हन्तेरजादेश गमेश्च

दीर्घः स्याज्झलादौ सनि। सन्लिटोर्जेः। जिगीषति। विभाषा चेः। चिकीषति। चिचीषति। जिघां

४(हलिति जातिपरं समीपवाची।)४

३(सनि किति ग्रहेः संप्रसारणं स्यात्)३

सि० कौ

॥८५॥

सति सन्निच। इणो गमिः स्यात्सनि न तु बोधने। जिगमिषति। बोधने तु प्रतीषिषति। इष्यादिकः॥ अ
धिजिगमिषति। कर्म्मणि लङ्। गमेरिट् परस्मैपदेष्वित्युक्ते नेट्। अज्झनगमां सनीति दीर्घः। जिगांस्य
ते। अधिजिगांस्यते। अज्झनादेशस्ये सुक्ते गच्छतेर्न दीर्घः। जिगंस्यते। संजिगंसते। इङश्च। इङो गमिः स्यात्स
नि। अधिजिगांसते। रलो व्युपधाद्धलादेः संश्च। उश्च इश्च वौ। तेदुपधे यस्य तस्मात् धलादे रलन्तात्परौ क्त्वा
सनौ सेटौ वा कितौ स्तः। द्युतिस्वाप्योरिति संप्रसारणं। दिद्युतिषते। दिद्योतिषते। रुरुचिषते। रुरोचि
षते। लिलिखिषति। लिलेखिषति। रलन्तात् किं। दिदेविषति। व्युपधात्किं। विवर्त्तिषते। हलादेः किं। र्ति
एषिषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबलं। ओपोर्ग्रेदित्कर
णस्य सामान्यापेक्षापकत्वात्। सनीवन्तर्धभ्रस्जदंभुश्रिस्वृयुर्णुभरज्ञपिसनां। इवंतेभ्यः ऋधा ॥८५॥

दिभ्यश्च सन इड्वा स्यात्। इडभावे। हलन्ताच्चेति कित्वं। छ्वोः शूडिति वस्योठ्। यण्। द्वित्वं। दुद्यूषति। दिदेविष
ति। स्तौतिण्योरेव षण्यभ्यासात् इति नियमान्न षः। सुस्यूषति। सिसेविषति। आप्ज्ञप्यृधामीत्। एषामच
ईत्स्यात् सादौ सनि। अत्र लोपोऽभ्यासस्य। सनि मीमा इति योरभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छ
ति ईप्सति। अर्धितुमिच्छति। रपरत्वं च ऋत्वं। ईर्त्सति। अर्दिधिषति। बिभ्रक्षिषति। बिभर्जिषति। बिभ्रक्ष
ति। बिभर्क्षति। दम्भ इच्च। दम्भेरच इत्स्यात् सादौ सनि। अभ्यासलोपः। हलन्ताच्चेत्यत्र हल्ग्रहणं जा
तपरमिति सूक्तेन सनः कित्वान्नलोपः। धिप्सति। धीप्सति। दिदम्भिषति। शिश्रीषति। शिश्रयिषति।
उदोष्ठ्यपूर्वस्य। सुस्वूर्षति। सिस्वरिषति। युयूषति। यियविषति। ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनुवि
षति। नन्वेपरत्वात् गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयते इति वाच्यं। द्विर्वचनेऽचीति सूत्रेणाद्वि

त्वेकर्तव्ये स्थानिरूपादेशात्॥ आदेशनिषेधात्॥ न च सन्नन्तस्य द्वित्वं प्रति कार्यित्वान्निमि-
त्तता कथमिति वाच्यं॥ कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते न त्वननुभवन्-
नपि॥ न चेह सन् द्वित्वमनुभवति॥ बुभूषति। बिभरिषति। ज्ञपिः। पुगन्तो मित्संज्ञकः।
पकारान्तश्चौरादिकश्च। इड्भावे। इकोऽझलिति कित्वान्न गुणः। अज्झनेति दीर्घः परत्वाण्णिलो-
पेन बाध्यते। आप्ज्ञपीति ईत्। ज्ञीप्सति। जिज्ञपयिषति। अमित्त्वस्तु जिज्ञापयिषति। जनसनेत्यात्वं॥
सिषासति। सिसनिषति। तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः। तनोतेर्विभाषा। अस्योपधाया दी-
र्घो वा स्यात् झलादौ सनि। तितांसति। तितंसति। तितनिषति। आशंकायां सन्वक्तव्यः। श्वा मुमू-
र्षति। कूलं पिपतिषति। सनि मीमाघुरभलभशकपतपदामच इस्॥ एषामच इस् स्यात् सादौ सनि।

अभ्यासस्य लोपः स्कोरिति सलोपः। पित्सति। दिदरिद्रिषति। दिदरिद्रासति। डुमिञ्। मीञ्। आभ्यासं-
न्तत्वदीर्घस्य मिनोतेरपि मीरूपा विद्या षादिस्॥ सः सी ति तः। मित्सति। मित्सते। मा माने। मि-
त्सति। माङ् मेङो मित्सते। दो दाणोः। दित्सति। देङ्। दित्सते। दाञ्। दित्सति। दित्सते। धेट्। धित्स-
ति। धाञ्। धित्सति। धित्सते। रिप्सते। लिप्सते। शके। शिक्षति। शक मर्षणे। दिवादिः। स्वरिते-
त्। शिक्षति। शिक्षते। पित्सते। राधो हिंसायामच इस्वाच्यः। रित्सति। हिंसायां किं। आरिरा-
त्सति। मुचोऽकर्मकस्य गुणो वा। सादौ सनि। अभ्यासस्य लोपः। मोक्षते। मुमुक्षते। वत्सः स्वय-
मेव। अकर्मकस्य किं। मुमुक्षति। वत्सं कृष्णः। न वृद्भ्यश्चतुर्भ्यः। विवृत्सति। तङि तु विवर्तिषते।

सि·कौ
॥८८॥

सेससिचीतिवेद्। निनर्तिषति। निनृत्सति। इट् सनिवा॥ ऋद्‌ऋभ्यां ऋदंतात्‌च सन इट्‌ वा। तितरिष
ति। तितरीषति॥ तितीर्षति। विवरिषति॥ विवरीषति॥ वुवूर्षति॥ ऋद्‌॥ बुभूर्षते॥ दुधूर्षति॥ स्मि
पूङ् रञ्ज्वशां सनि॥ स्मिपूङ्‌ऋ अञ्जू अशू एभ्यः सन इट् स्यात्॥ सिस्मयिषते॥ पिपविषते॥ अ
रिरिषति। इह रिस् शब्दस्य द्वित्वं॥ इसितिसनोवयवः॥ कार्यभागितिकार्यिणो निमित्तत्वायोगात्
द्विर्वचनेचीतिन प्रवर्तते। अंजिजिषति॥ अशिशिषति। उभौ साभ्यासस्य॥ प्राणिणिषति॥
उछेस्तू कचुत्वं। पूर्वत्रासिद्धीयमद्वित्व इति चक्काभ्यांसहितस्य द्वित्वं। हलादिः शेषः। उचिच्छिषति
निमित्तापायेनैमित्तिकस्याप्यपाय इति त्वंनित्यं। छ्वोरिति सतुक ग्रहणाज्ज्ञापकात्। प्रच्छतिश्रत्या
पतिवचनाद्वा। णौ च संश्चङोः इति सूत्राभ्यां इङो गाङ् श्वयतेः संप्रसारणं च वा॥ अधिजिगापयिष

स ॥ ८ ॥ ॥८८॥

ति॥ अध्यापिपयिषति। शिश्वाययिषति। शुशावयिषति। ह्वः संप्रसारणं॥ जुहावयिषति। णौ द्वित्वात्प्रा
गेव आदेशो नेत्युक्त्वादुकारस्य द्वित्वं। पुस्फारयिषति। चुक्षावयिषति। ओः पुयण्ज्यपरे। पिपावयि
षति। बिभावयिषति। यियावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। पुयण
जीति किं। नुनावयिषति। अपरे किं। बुभूषति। स्रवतीत्येवं वा॥ सिस्रावयिषति। सुस्रावयिष
तीत्यादि। अपर इत्येव। शुश्रूषते। सस्तोति ण्योरेव षण्यभ्यासात्। अभ्यासे यणः परस्य स्तौति
२४ ण्यंतयोरेव सस्य षः स्यात्षभूते सनि नान्यस्य। तुष्टूषति। द्युतिस्वाप्योरिति। अभ्यासस्य संप्रसार
णं। सुष्वापयिषति। सिषाधयिषति। स्तौति ण्योः किं। सिसिक्षति। उपसर्गात्सुस्थादिष्वभ्या

सेनेति षत्वं ॥ परिषिषिक्षति ॥ षणि किं ॥ तिष्ठासति ॥ सुषुप्सति ॥ अभ्यासादिस्तुत्वेनेह निषेधः ॥ इण्णू ॥ प्रतीषिष
ति ॥ इकुऽध्यैषिषति ॥ सस्विदिस्वदिसहीनां च ॥ अभ्यासेणः परस्य ण्यन्तानामेषां स्य एव न षः षणि परे ॥
सिस्वेदयिषति ॥ सिस्वादयिषति ॥ सिसाहयिषति ॥ स्थादिष्वभ्यासेनेति नियमान्नेह ॥ अभिसुसु
षति ॥ शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ॥ सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्य
ते ॥ २ ॥ शैषिकात्सरूपः शैषिको न । तेन शालीये भव इति वाक्यमेव ॥ मतुपर्थीयाच्छः ॥ सरूपः किं
आहिच्छत्रे भवः आहिच्छत्रीयः ॥ अणन्ताद्घः ॥ मत्वर्थीयात्सरूपः सन् ॥ दण्डवानस्य । स्तीति
इह मतुबन्तान्मतुप् ॥ विरूपस्तु स्यादेव । दण्डिमतीशालाः ॥ सरूप इत्यनुषङ्गफलं ॥ अर्थद्वारा ॥८९॥
सादृश्यं तस्यार्थः । तेनेच्छासन्नन्तात्सन्न ॥ क्वाथसन्नन्तात्स्यादेव । जुगुप्सिषते । मीमांसिषते ॥

इति सन्प्रक्रिया ॥ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥ पौनःपुन्यं भृशार्थश्च क्रिया
समभिहारः । तस्मिन्द्योत्ये यङ् स्यात् । गुणो यङ्लुकोः ॥ अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च ।
सनाद्यन्ता धातव इति धातुत्वाल्लडादयः । ङित्त्वादात्मनेपदं । पुनःपुनरतिशयेन वा भव
ति बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट । धातोः किं । आर्धधातुकत्वं यथा स्यात् । तेन भ्रुवो वुक् चिरिया
दि । एकाचः किं । पुनःपुनर्जागर्ति । हलादेः किं । भृशमीक्षते । भृशं शोभते रोचते इत्यत्र यङ् नेति भाष्यं ।
पौनःपुन्ये तु स्यादेव ॥ रोरुच्यते । शोशुभ्यते । सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः । आद्याः
स्त्रयः चुरादावदन्ताः । सोसूच्यते ॥ सोसूत्र्यते ॥ अनेकाच्त्वेनाषोपदेशत्वात्सत्वं । मोमूत्र्यते ।
यस्य हलः ॥ यस्येति संघातग्रहणं । हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके ॥ आदेःप

रस्य। अतोल्लोपः। सोसूचांचक्रे। सोसूचिता। मोमुमूत्रेता। दीर्घोकितः। अकितोभ्यासस्य दीर्घःस्याद्य
ङि·यङ्लुकिच। अटाट्वते। यङि·च। अर्तेःसंयोगादेश्चक्रृतोगुणःस्याद्यङि·। यकारपरस्यरेफ·स्यनद्वित्वं
निषेधः। अरार्यतइतिभाष्योदाहरणात्। अरारिता। अशाशिता। ऊर्णोनुयते। बेभिद्यते।
अद्दैलोपस्यस्थानिवत्वाल्लोपधागुणः। बिभिदिता। नित्यंकौटिल्येगतौ। गत्यर्थात्कौटि
ल्यएवयङ्स्यात्नतुक्रियासमभिहारे। कुटिलंव्रजतिवाव्रज्यते॥ लुपसदचरजपजभदह
दशगृभ्योभावगर्हायां॥ एभ्योधात्वर्थगर्हायामेवयङ्स्यात्। गर्हितंलुंपतिलोलुप्यते। सो

सद्यते। चरफलोश्च॥ अनयोरभ्यासस्यातोनुक्स्याद्यङ्लुकोः॥ नुगितिस्तनेनानुस्वारोन
क्ष्यतेसचपदांतवद्वाच्यः। वापदांतस्येतियथास्यात्। उत्परस्यातः॥ चरफलोरभ्यासा

परस्यातउत्स्याद्यङ्लुकोः॥ हलिचेतिदीर्घः। चंचूर्यते। चञ्चूर्यते॥ पम्फुल्यते॥ यंपुत्स्यते। जपजभदह
दशभंजपशांच॥ एषामभ्यासस्यनुक्स्याद्यङ्लुकोः॥ गर्हितंजपतिजंजप्यतइत्यादि। ग्रोयङि·। गिर
तेरेफस्यत्वंस्याद्यङि·॥ गर्हितंगिलतिजेगिल्यते॥ घुमास्थेतीत्वं॥ द्वित्वं। गुणः। देदीयते। पेपी
यते। सेषीयते। विभाषाश्वेः॥ शोशूयते। शेश्वियते॥ यङि·च॥ सास्मर्यते। रीङृतः। चेक्रीयते।
सुट्संचेस्कीयते। सिचोयङि·॥ सिचःसस्यषोनस्याद्यङि·॥ सेसिच्यते॥ नकवतेर्यङि·॥ कवतेर
भ्यासस्यचुत्वंनस्याद्यङि·॥ कोकूयते कौतिकुवतोस्तुचोकूयते नीग्वंचुस्रंसुध्वंसुभ्रंसुकसप
तपदस्कंदां एषामभ्यासस्यनीगागमःस्याद्यङ्लुकोः अकितइत्युक्तेर्नदीर्घःनलोपः व

नकुङोप
ङिइतिअ
खुऽ

(अंतग्गर्हस्सश्चार्थः)१

॥९१॥

नीवच्यते॥ सनीस्रस्यतइत्यादि। नुगतोनुनासिकांतस्य। अनुनासिकांतस्यांगस्ययोभ्यासोदंतस्तस्य
नुकूस्यात्॥ नुकानुस्वारोत्तन्क्ष्यतइतितूक्तंपंपम्यते। तपरत्वसामर्थ्यान्नूतपूर्वदीर्घस्यापिन। नाम
क्रोधे॥बाभाम्यते॥ येविभाषा। जाजायते। जंजन्यते। हंतेर्हिंसायांयङि घ्नी भावोवाच्यः॥जेघ्नीय
ते। हिंसायां किं। जंघन्यते। रीगृदुपधस्यच॥ ऋदुपधस्यधातोरभ्यासस्यरीगागमः स्याद्यङ्लु
कोः। वरीवृसते। क्षुभ्नादित्वान्नणः नरीनृत्यते॥ जरीगृह्यते॥ उभयत्रत्वेनत्न॥ चरीकृप्यते॥ रीगृत्वत
इतिवाच्यं॥ वरीवृश्च्यते॥ परीपृच्छ्यते॥ स्वपिस्यमिव्येञांयङि॥ संप्रसारणंस्यात्॥ सोषुप्यते॥ से
सिम्यते॥ वेवीयते॥ नवशः॥ वावश्यते॥ चायः की। चेकीयते॥ ई घ्राध्मो॥ जेघ्रीयते॥ देध्मीयते॥
अयङि क्ङिति॥ शीङोयङादेशस्याद्याक्ङिति॥ शाशय्यते॥ अभ्यासह्रस्वः॥ ततोगुणः॥ डोढौक्यते॥

॥९१॥

तोत्रोक्यते॥ इतियङ्प्रक्रिया॥ यङोचिच॥ यङोचिप्रत्ययेलुक्स्यात् चकारात्तंविनापि बहुलंलु
कस्यात्॥ अनैमित्तिकोयमंतरंगत्वादादौभवतिततःप्रत्ययलक्षणेनयङंतत्वाद्द्वित्वं॥ अभ्या
सकार्यं॥ धातुत्वाल्लुङादयः॥ शेषात्कर्त्तरीतिपरस्मैपदं॥ अनुदात्तङितइतिलुनङितस्यप्र
त्ययाप्रत्ययसाधारेणेनप्रत्ययलक्षणाप्रवृत्तेः॥ यत्रहिप्रत्ययसाधारणंरूपमाश्रीयतेत
त्रैवतत॥ अतएवसुदृषत्प्रासादइत्यत्रात्वसंतस्येतिदीर्घोन॥ घेपिस्यर्धशीङादयोनुदात्तङि
तस्तेभ्यापिन॥ अनुदात्तङितइत्यनुबंधनिर्देशात्॥ तथाचाहतिश्नापेतिनिषेधात्॥ अत
एवश्यनादयोन॥ गणेननिर्देशात्॥ किंतुशबेव॥ चर्करीतंचेतिपागात्शपोलुक्॥ य

॥९१॥

ङ्नेवा॥ यङ्लुगन्तस्य हलादेः पितः सार्वधातुकस्येड् स्यात्॥ भूसुवोरिति गुणनिषेधो यङ्लु
कि भाषायां न॥ बोभूतु तेतिक्ते इति छन्दसि निपातनात्॥ अत एव भाषायामपि यङ्लु
क् सिध्यः॥ नैव यङ्लुकि अभ्यास एव गुणाभावो निपात्यतामिति वाच्यम्॥ प्रकृतिग्रह
णे यङ्लुगन्तस्यापि ग्रहणात्॥ द्विः प्रयोगो द्विर्वचनमिति सिद्धान्तात्॥ बोभवीति॥
बोभोति॥ बोभूतः॥ बोभुवति॥ बोभवांचकार॥ बोभविता॥ अबोभवीत्॥ अबोभोत्॥
अबोभूतां॥ अबोभवुः॥ बोभूयात्॥ बोभूयास्तां॥ बोभूयासुः॥ गातिस्थेति सिचो लुक्॥
यङो वेति ईट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक्॥ अबोभूवीत्॥ अबोभोत्॥ अभ्यस्तात्

रामः ॥९२॥

योऽजुस्॥ नित्यत्वाद्वुक्॥ अबोभूवुः॥ अबोभविष्यदित्यादि॥ पास्पर्धीति॥ पा
स्पर्द्धि पास्पर्धः॥ पास्पर्धति॥ पास्पर्सि॥ हुझल्भ्यो हेर्धिः॥ पास्पर्धि लङ्॥ अ
पास्पर्त्॥ अपास्पर्द् सिपि दश्चेति रुत्वपक्षे रोरि॥ अपास्पाः॥ जागाधि॥ जा
घात्सि॥ अजाघात्॥ सिपि रुत्वपक्षे अजाघाः॥ राध॥ नानात्ति॥ नानात्तः॥ द
ध॥ दादधि॥ दादध्वः॥ दाधत्सि॥ अदाधत्॥ अदादधां॥ अदादधुः॥ अदाधः॥
अदाधत्॥ लुङि॥ अदादाधीत्॥ अदादधीत्॥ चोस्कुन्दीति॥ चोस्कुन्दति॥ अचोस्कु
न्॥ अचोस्कुन्तां॥ अचोस्कुन्दुः॥ मोमुदीति॥ मोमोत्ति॥ मोमोदांचकार॥ मोमोदि

५

ता॥ अमोमुदीत्॥ अमोमोत्॥ अमोमुत्तां॥ अमोमुदुः॥ अमोमुदीः॥ अमोमोः॥ अमोमोद्॥
लुङि गुणः॥ अमोमोदीत्॥ चोकूर्ति॥ चोकूर्दीति॥ लङ्॥ लिट्॥ अचोकूर्त्॥ सिप्पक्षे अचो
कूः॥ अचोखूः॥ अचोगूः॥ वनीवंचीति॥ वनीवंक्ति॥ वनीवक्तः॥ वनीवचति॥ अवनीवं
चीत्॥ जंगमीति॥ जंगंति॥ अनुदात्तोपदेशेत्यनुनासिकलोपः॥ जंगतः॥ जंग्मति॥ म्वोश्च॥
जंगन्मि॥ जंगन्वः॥ एकाच्ग्रहणस्योपलक्षणत्वान्नेण्निषेधः॥ जंगमिता। अनुनासिकलोप
स्याभीयत्वेनासिद्धत्वान्न हेर्लुक्। जंगहि॥ मो नो धातोः॥ अजंगन्। अनुबंधनिर्देशान्नेच्छे
रङ्। हलंतेति न वृद्धिः। अजंगमीत्। अजंगमिष्टां। हंतेर्यङ्लुक्। अभ्यासाच्चेति कुत्वं। घघाणि
होर्हंतेरित्यनुवर्त्य विहितं लभ्यापि यङ्लुकि भवत्येवेति न्यासकारः श्तिपाशपेति

निषेधस्तु अनित्यः। गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भावः।
जंघनीति॥ जंघंति। जंघतः। जंघ्नति। जंघनिता। श्तिपा निर्देशाज्जादेशो न।
जंघहि॥ अजंघनीत्॥ अजंघन्॥ जंघन्यात्॥ आशिषि तु॥ वध्यात्॥ अवधीत्॥
अवधिष्टामित्यादि॥ वधादेशस्य द्वित्वं तु नैभति॥ स्थानिवत्वेनानभ्यासस्येति निषेधात्॥
तद्धि समानाधिकरणं धातोर्विशेषणं बहुव्रीहित्वात्॥ आङ्पूर्वात् आङो यमहन इत्या
त्मनेपदं॥ आजंघंते इत्यादि॥ उत्परस्येति तपरत्वान्न गुणः॥ हलि चेति दीर्घस्तु स्यादेवातस्या
सिद्धत्वेन तपरत्वे निवस्यताया योगात्॥ चंचूर्ति॥ चंचूर्तः॥ चंचुरति॥ अचंचुरीत्॥ अचंचूः॥ चं

खनीति॥ चंखंति॥ जनसनेसात्वं॥ चंखातः॥ गमहनेत्युपधालोपः॥ चंखन्ति॥ चंखा
हि॥ चंखनानि॥ अचंखनीत्॥ अचंखन्॥ अचंखातां॥ अचंखन्॥ ये विभाषा॥
चंखायात्॥ चंखन्यात्॥ अचंखनीत्॥ उतोवृद्धिरित्यवनाभ्यस्तस्येत्यनुवृत्तेर्लुकोवृद्धि
नं॥ योयोति॥ योयवीति॥ अयोयवीत्॥ अयोयोत्॥ योयुयात्॥ आशिषि दी
र्घः॥ योयूयात्॥ अयोयावीत्॥ नोनवीति॥ नोनोति॥ जाहेति॥ जाहाति॥ इहन्यघोः॥
जाहितः॥ इहजहातेश्च॥ आचहो॥ लोपोयि॥ घुमास्था॥ एर्लिङि इत्येते पञ्चापि
न भवंति॥ श्तिपा निर्देशात्॥ जाहति॥ जाहासि॥ जाहेषि॥ जाहिथः॥ जाहिथ॥

जाहीहि॥ अजहित्॥ आजाहात्॥ अजाहातां॥ अजाहुः॥ जाहीयात्॥ आशिषि जाहायात्॥
अजाहासीत्॥ अजाहासिष्टां॥ अजाहिष्यत्॥ लुकालुप्ते प्रत्ययलक्षणाभावात्॥ स्वपीस्वमीसु
त्वेन॥ रुदादिभ्य इत्यत्रिगणनिर्दिष्टत्वादिण्न। स्वास्वपीति॥ सास्वाप्ति॥ सास्वप्तः॥ सास्व
पति॥ असास्वपीत्॥ आशिपिवचिस्वपीसुत्वं सासुस्यात्॥ रुग्रिकौ च लुकि॥ ऋदुपधस्य धातो रुग्रिका
वस्य रुकुरिकुरीकू एते आगमास्सुर्यङ्लुकि॥ ऋतश्च॥ ऋदंतस्य धातोरपि तथा॥ वरूवृतीति॥ वरिवृतीति॥ व
रीवृतीति॥ वर्वर्ति। वरिवर्ति। वर्वृतः ३ वर्वृतति। वर्वर्तिता। गणनिर्दिष्टत्वान्नवृद्भ्य इतीण्निषेधोन॥ वर्वर्तिष्यति॥
अवर्वृतीत्॥ अवर्वर्त्॥ सिपि दश्चेति रुत्वपक्षे अवर्वः ३ गणनिर्दिष्टत्वादडुन॥ अवर्वर्तीत्॥ ३ चर्करीति। चर्कर्ति।
चरिकर्ति। चरीकर्ति। चर्कृतः ३ चर्क्रति॥ ३ चर्करांचकार॥ ३ चर्करिता। ३ अचर्करीत्। ३ अचर्कः ३। चर्कृयात्। आ

आशिषि रिङ्। चर्क्रियात्॥ अचर्कारीत्॥ ऋतश्चेति तपरत्वान्नेह॥ कॄ विपेक्षे। चाकर्ति। इत्वे चाकरी
तः। चाकीर्तः॥ तात्वर्ती॥ तार्तीतः॥ तातिरति। तातर्हि। तातराणि॥ अतातरीत्। अतातः। अतातिर्ताः।
अतातरुः। अतातारीत्॥ अतातारिष्टामित्यादि॥ अर्तेर्यङ्लुकि द्वित्वेऽभ्यासस्यारदत्वं परत्वाच्च हलादिः शेषः।
रुक्। रिग्नी कोरुक् अभ्यासस्यासवर्णे इति यङ्। अरर्ति॥ अरियर्ति॥ अररीति॥ अरियरीति॥ अरर्कृतः। अरियृतः।
झि अरत्। यणत्र को रोरी ति लोपः। न च तस्मिन्कर्तव्ये यणः स्थानिवत्त्वं पूर्वत्रासिद्धे न स्थानिवदिति निषेधात्। आररति॥ अरियति।
लिङि क्तिपा निर्देशाद् गुणो न। नेटु गुणो न रिङ्। रलोपः। दीर्घः। आरियात्। अरियरियात्। यङ्ग्रहणे। जागृहीति। जर्गे
र्दि॥ जर्गृढः। जर्गहति। अजर्घट्। गस्त्यात्स्कः जागृहीति। जापार्द्धि। जागृहति। जागृहीषि। जागृक्षि। लुङि जा
गृहीता। गृहोऽलिटि दीर्घो न। तत्रैकाच इत्यनुवृत्तेः। माधवस्तु दीर्घमाह। तद्भाष्यादिविरुद्धं। गृधु अभिकांक्षायां।

तस्य दौ ङिति निमित्तं संप्रसारणं। तस्य बहिरंगत्वेनासिद्धत्वान्न सम्प्रसारणादयः। जागृधः। २

रित्यादि। जर्गृधीति। जर्गृद्धः। जर्गृधति। जर्गृधी। षि। जर्घृत्सि। अजर्गृधीत्। इडभावे गुणः। ह
ल्ङ्यादिलोपः। भष्भावः। जस्त्वचर्त्वे। अजर्घर्तु। अजर्गृध्यां। सिपि दश्चेति रुत्वं। अजर्घाः।
अजर्गृधीत्। अजर्गर्धिष्टां। पाप्रच्छीति। पाप्रष्टि। तस्य दोर्य्यहि अत्ति संप्रसारणं न भवति। क्तिपा निर्देशा
त्। छ्वोः शूडिति शः। व्रश्चेति षः। पाप्रष्टः। पाप्रच्छति। पाप्रश्मि। पाप्रच्छः। पाप्रश्मः। यकारवकारान्तानां
ऊठ्भावं विना यङ्लुङ् नास्तीति भाष्यध्वनितं॥ कैयटेनस्य स्फुटीकृतं। दूदच्छ्वोरिति यत्रोदत्तद्विषयकं
जरत्वस्य ऊठ्भाविनोऽस्ति विभव्यास्तु यङ्लुकस्येवेति न्याय्यं। माधवादि संमतं च। भव्येबंधने।
अयं यान्त ऊठ्भावीति रूदेरूदेवनने। इत्यादयो वान्ताः। हयगतौ। जाहयीति। जाहति। जा
हतः। जाहयति। जाहयीषि। वलि यलोपे य जासैदीर्घः। जाहामि। जाहावः। जाहामः।

हृ गतिकौटिल्ये। जर्हर्ति। जाहर्ति। जाहृतः। जाहर्यति। लोटि। जाहर्हि। अजाहः। अजाहर्तां। अजाहर्युः। मव बंधने। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। ज्वरादीनामुपधावकारयोरूठ्स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये। अत्र क्ङितीति नानुवर्त्तते। अवतेस्तुनि ओतुरिति दर्शनात्। अनुनासिकग्रहणं चानुवर्त्तते। अवतेर्मनिन्प्रत्यये तस्य टिलोपे ओमिति दर्शनात्। मामवीति। इडभावे ऊठि पिति गुणः। मामोति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु। मामूतात्। मामूतां। मामूहि। मामवानि। अमामोत्। अमामोः। अमामवं। अमामाव। अमामूव। तुर्वी हिंसायां। राल्लोपः। रेफात्परयोश्छ्वोर्लोपः स्यात् क्वौ झलादावनुनासिकादौ प्रत्यये इति वलोपः। लघूपधगुणः। न धातुलोप आर्धधातुके। धात्वंशलोपनिमित्ते आर्धधातुके परे इकोगुणवृद्धी न स्तः। इति निषेधः। तिबादीनामनार्धधातुकत्वात्। तोतोर्त्ति। तोतूर्त्तः। तोतूर्वति। तोतोर्षि। तोतोर्मि। मुर्छा मोमोर्त्ति। मोमूर्त्तः। मोमूर्छति इत्यादि। आर्धधातुके इति

विषयसप्तमी। तेन यङि विवक्षिते। अजेर्वीभावः। वेवीयते। अस्य यङ्लुङ्नास्ति। केचित्तु अपवादविषयत्वात् संभवेन वी भावस्याप्रवृत्तेः। इति यङ्लुगंतप्रक्रिया। सुप आत्मनः क्यच्। इषिकर्मणः एषितुः संबंधिनः सुबंतादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात्। धातुवयवत्वात्सुपो लुक्। क्यचि च। अस्य ई स्यात्। आत्मनः पुत्रमिच्छति पुत्रीयति। वांतो यि प्रत्यये। गव्यति। नाव्यति। लोपः शाकल्यस्येति नापदांतत्वात्। तथाहि। नः क्ये। क्यचि क्यङि नांतमेव पदं नान्यत्। सन्निपातपरिभाषया क्यचो यस्य लोपो न। गव्यांचकार। गव्यिता। नाव्यांचकार। नाव्यिता। नलोपः। राजीयति। प्रत्ययोत्तरपदयोश्च। त्वद्यति। मद्यति। एकार्थयोरित्येव। युष्मद्यति। अस्मद्यति। लिनि च। गीर्यति। पूर्यति। धातोरित्येव। नेह। दिवमिच्छति दिव्यति। दूहपुरमिच्छति पुर्यति। इति मा धवनो क्त भेदकदाहरणं चिंत्यं। पूर्गिरिः

सि॰ कौसाम्यात्॥ दीव्यतीति दीर्घः स्तुभांचः प्रामादिक एवं॥ अदस्यति॥ रिङ्लः॥ कर्त्रीयति॥ क्यच्योश्च॥
गार्गीयति॥ [illegible] वाच्यति॥ अकृत्सार्वेति दीर्घः॥ कवीयति॥ समिध्यति॥ क्यस्य विभाषा॥
हलः परयोः क्यच्क्यङोर्लोपो वास्यादार्धधातुके। आदेः परस्य अतोलोपः। तस्य स्थानिवत्वाल्लघूपधगु
णोन। समिधिता। समिध्यिता। मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच्च। किमिच्छति॥ इदमिच्छति।
स्वरिच्छति। अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु। क्यजन्तानि पात्यंते। अशनायति।
उदन्यति॥ धनायति॥ बुभुक्षादौ किं। अशनीयति॥ उदकीयति॥ धनीयति॥ अश्वक्षीरवृषल
वणानामात्मप्रीतौ क्यचि॥ एषां क्यचि॥ असुगागमः स्यात्॥ अश्ववृषयोर्मैथुनेच्छायां॥ अश्व
स्यति वडवा॥ वृषस्यति गौः॥ क्षीरलवणयोर्लौलसायां॥ क्षीरस्यति बालः॥ लवणस्यति उष्ट्रः॥ स

५४

९७

र्वप्रातिपदिकात्क्यचि लालसायां सुगसुकौ॥ दधिस्यति॥ दध्यस्यति॥ मधुस्यति॥ मध्वस्य
ति॥ काम्यच्च॥ उक्त विषये काम्यच् स्यात्॥ पुत्रमात्मन इच्छति पुत्रकाम्यति॥ पुत्रकाम्यिता इह प
स्य हल इति लोपेन अनर्थकत्वाद्घुस्येति सुघातग्रहणमित्युक्तं॥ यशस्काम्यति॥ सर्पिष्का
म्यति॥ मान्ताव्ययेभ्योऽप्ययं स्यादेव॥ किंकाम्यति॥ स्वः काम्यति॥ उपमानादाचारे॥
उपमानात्कर्मणः॥ सुबन्तादाचारेऽर्थे क्यच् स्यात्॥ पुत्रमिवाचरति पुत्रीयति छात्रं॥
विष्णूयति द्विजं॥ अधिकरणाच्चेति वक्तव्यं॥ प्रासादीयति॥ कुट्यां कुटीयति प्रासादे॥ कर्तुः क्यङ्
सलोपश्च॥ उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्॥ सान्तस्य तु कर्तृवाचकस्य लोपो

सि·कौ·

९८

वास्यात्॥ क्यङ्॥ कङ्के: पङ्क्तेवा क्यं॥ सान्तस्य लोपस्क क्यङ्संनियोगशिष्टः सच्व्यन्तस्थितः॥ ओजसोप्सरसोनित्यमितरेषांवि
भाषया॥ कृष्णाइवाचरतिकृष्णायते॥ ओजःशब्दोवृत्तिविषयेलदंति॥ ओजायते॥ अप्सरायते॥ भृशायते॥ यशास्यते॥ विद्व
यते॥ विद्वस्यते॥ त्वद्यते॥ मद्यते॥ अनेकार्थेयुतुयुष्मद्यते॥ अस्मद्यते॥ क्यङ्मानिनोश्च॥ कुमारीवाचरतिकुमारायते॥ ह
रिणीवाचरति॥ [illegible]रितायते॥ गुर्वीवाचरतिगुरूयते॥ सपत्नीवाचरतिसपत्नायतेसपतीयते॥ सपत्नीयते॥ युवतिरिवयुवाय
ते। पट्वीमृद्व्याविवपट्वीमृद्वयते॥ नकोपधायाः पाचिकायते॥ आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा॥ वाग्रहणात्क्य
ङपि॥ अवगल्भादयः पचाद्यजन्ताः॥ क्विप्संनियोगेनानुदात्तत्वमनुनासिकत्वंचाच्प्रत्ययस्यप्रतिज्ञायते॥ तेनतङ् अव
गल्भते। क्लीबते। होडते॥ भूतपूर्वादृध्यनेकाचआम् एतद्वार्त्तिकारंभसामर्थ्यात्॥ नचावगल्भतइत्यादिसिद्धिस्तत्फलं॥ कै
वलानामाचारेपिवृत्तिसंभवात्॥ धातूनामनेकार्थत्वात्॥ अवगल्भांचक्रे॥ होडांचक्रे॥ क्लीबांचक्रे। वार्त्तिकेऽवेत्युपस
र्गपाठात् केवलादुपसर्गान्तरविशिष्टाच्च क्विब्वेतिमाधवादयः॥ तन्नेतितूचितं॥ सर्वप्रातिपदिकेभ्यः क्विब्वावक्त
व्यः॥ पूर्ववार्त्तिकंतुअनुबंधासंगार्थंतत्रक्विबनूद्यते॥ प्रातिपदिकग्रहणादिहसुपइतिनसंबध्यते॥ तेनपदकार्यंन।

९८

कृष्णइवाचरतिकृष्णति॥ अतोगुणइतिशापासहपररूपं॥ अश्वइवाचरतिअश्वति॥ अतः आंति॥ प्रत्ययग्रहणमपनी
मानेकाचइत्यकेर्नाम्॥ औ अतुः उः द्वित्वं॥ अतोगुणेप्राप्ते अतआदेरितिदीर्घः॥ णल्॥ औ अतुः उः वृद्धिः। अतुस
दिषुत्वातोलोपइटिचेत्यालोपः॥ मालेवाचरतिमालाति॥ लिंगविशिष्टपरिभाषयाएकारौदैस्यपूर्ववत्त्वाद्दाक्वि
प्॥ मालांचकार॥ लुङि अमालात्॥ अत्रहल्ङ्यादिलोपोन॥ ङीसाहचर्यादापोपिसोरेवविधानात्॥ इट्
सकौ॥ अमालासीत्॥ कविरिवकवयति॥ आशीर्लिङि॥ कवीयात्॥ सिचिवृद्धिरित्यत्रधातोरित्यनु
वर्त्यधातुरेवयोधातुरितिव्याख्यानात्॥ नामधातोर्नवृद्धिरितिकैयटादयः॥ अकवयीत्। माधवस्तुना
मधातोरपिवृद्धिमिच्छतिअकवायीत्॥ विरिववयति॥ विवाय॥ विव्यतुः॥ अवयीत्॥ अवायीत्॥ श्रीरिवश्रयति॥ शि
श्राय॥ शिश्रियतुः॥ पितेवपितरति॥ आशिषिरिङ्॥ पित्रियात्॥ भुरिवभवति॥ अत्रगातिस्थेतिभुवोवुगिति

यी

भवतेरितिवनभवति॥ अभिव्यक्तित्वेन धातुपाठस्थस्यैव तत्र ग्रहणात्॥ अभावीत्॥ बुभाव॥ दुखिद्रवति॥ णिश्री
तिचङ्॥ अदुद्रावीत्॥ अनुनासिकस्य क्विझलोः क्ङिति॥ अनुनासिकांतस्योपधाया दीर्घः स्यात्क्वौ झलादौ क्ङिति॥
इदमिवाचरति इदामति॥ राजानति॥ पंथा इव पथीनति॥ मथीनति॥ ऋभुक्षीणाति॥ घोरिवि दे
वतीवति माधवः॥ माधवस्तु ण्यल्लोपाविति वचनात्॥ णलि वृद्धिर्वा धिहानो लोपात्
चकइतिरूपमाह। स्व इति। सस्वो सस्वतुः। यत्तु स्वो मास्त। स्वो चकारेलितदनाकोके २
समेव॥ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्याद
न्तानामेषां लोपश्च॥ अभृशो भृशो भवति भृशायते॥ अच्वेरिति पर्युदासबलाद्भूततद्भाव इति लभ्
यं॥ तेनेह न॥ कदिवा भृशा भवंति ये रात्रौ भृशाः नक्षत्रादयः ते दिवा कभवंतीत्यर्थः॥ सुमनस॥ ११

अत्रोठिघवतीसुचितं। कइव च कावितिहरदत्तादयः॥५

अस्य सलोपः॥ सुमनायते॥ चुरादौ संग्रामयुद्ध इति पठ्यते तत्र संग्रामेति प्रातिपदिकं तस्मात्तत्क
रोतीति णिचि सिद्धः तत्संनियोगेनानुबंधे आसज्यते॥ युद्धे यो संग्रामशब्द इस्सु चौपि सामर्थ्यो
त् संग्रामशब्दे लब्धे विशिष्टपाठो ज्ञापयति॥ उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्
ययचि। कीर्त्तिते पृथक्क्रियत इति॥ तेन मनःशब्दात्प्रागट्॥ स्वमनायत। उन्मनायत। उदमनायत। एवं चावागल्भ
त। अवागल्भिष्टेत्यादावप्यवेत्यस्य पृथक्करणं बोध्यं॥ ज्ञापकं च सजातीयविषयं॥ तेन यत्रोपसर्गरूपं सकलं श्रू
यते नत्वादेशेनापहृतं तत्रैव पृथक्कृतिः॥ एवं चाऽऊढः ओढः। सइव आचर्य ओढयित्वा अत्रोन्मनाय्य अवग
ल्भ्येतिवत् न ल्यप्॥ ज्ञापकस्य विशेषविषयत्वे भाष्यं वार्त्तिकं तद्भाष्यं च प्रमाणं॥ तथाहि॥ उस्योमाङ्क्ष्वाटः प्रति
षेधः। उसि ओमाङोश्च परयोराटः पररूपं नेत्यर्थः॥ उस्रामिवाचरत् औस्रीयत। ओंकारीयत। औढीयत। आटश्चे
ति च शब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति भाष्ये स्थितं॥ लोहितादिडाज्भ्यः क्यष्॥ लोहितादिभ्यो डाजंत

सि॰को॰

१००

च भवत्यर्थे क्यष् स्यात्॥ वा क्यषः॥ क्यषंतात् परस्मैपदं वा स्यात्॥ लोहितायति। लोहितायते॥ अत्राच्वेरित्यनुवृत्त्या
भूततद्भावविषयत्वं लब्धं॥ तच्च लोहितशब्दस्यैव विशेषणं न तु डाचोऽसंभवात्॥ नायादिशब्दग्राह्याणां तस्य
प्रत्याख्यानात्॥ तथा च वार्त्तिकं॥ लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति॥ न चैवं काम्यच इव क्यषोऽपि कका
रः श्रूयेत उच्चारणसामर्थ्यादिति वाच्यं॥ तस्यापि भाष्ये प्रत्याख्यानात्॥ पटपटायति॥ पटपटायते॥ कृभ्वस्तियोगे वि
नापि डाच्॥ अजंतात् क्यषो विधानसामर्थ्यात्॥ यत्तु लोहितश्यामदुःखानि गर्वहर्षसुखानि च॥ मूर्छानिद्राकृपाधूमाः
करुणा नित्यकर्मणीति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरंति॥ तद्भाष्यवार्त्तिकविरुद्धं॥ तस्मात्तेभ्यः क्य
ङेव॥ श्यामायते॥ दुःखादिभ्यो वृत्तिविषये तद्वृत्तिर्वर्त्तते॥ लिंगविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष्॥
लोहिनीयति। लोहिनीयते॥ कष्टाय क्रमणे॥ चतुर्थ्यंतात् कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात्॥ कष्टाय क्रमते कष्टा
यते॥ पापं कर्त्तुमुत्सहत इत्यर्थः॥ सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यं॥ कण्वं पापं॥ सत्रा
दयो वृत्तिविषये पापार्थाः तेभ्यो द्वितीयांतेभ्यश्चिकीर्षायां क्यङ्॥ पापं चिकीर्षतीत्यस्वपदविग्रहः सत्रायते। क

१००

क्षायते इत्यादि॥ कर्मणो रोमंथतपोभ्यां वर्त्तिचरोः॥ रोमंथतपोभ्यां कर्मभ्यां क्रमेण वर्त्तमानायां चरणे चार्थे क्यङ्
स्यात्॥ रोमंथं वर्त्तयति रोमंथायते गौः॥ हनुचलन इति वक्तव्यं॥ चर्वितस्याकृष्य पुनश्चर्वणे इत्यर्थः॥ नेह कीटो
रोमंथं वर्त्तयति॥ अपानप्रदेशान्निस्सृतं द्रव्यमिह रोमंथः तमश्नातीत्यर्थ इति कैय्यटः॥ वर्त्तुलं करोतीत्यर्थ इति
न्यासकारहरदत्तौ॥ तपसः परस्मैपदं च॥ तपश्चरति तपस्यति॥ बाष्पोष्मभ्यामुद्वमने॥ आभ्यां कर्मभ्यां क्य
ङ् स्यात्॥ बाष्पमुद्वमति बाष्पायते। ऊष्मायते। फेनाच्चेति वाच्यं॥ फेनायते॥ शब्दवैरकलहाभ्रकलहाभ्रकण्व
मेघेभ्यः करणे॥ एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्॥ शब्दं करोति शब्दायते। पक्षे तत्करोतीति णिजपीष्यत इ
ति न्यासः॥ शब्दयति॥ सुदिनदुर्दिननीहारेभ्यश्च॥ दुर्दिनायते॥ सुखादिभ्यः कर्त्तृवेदनायां॥ सुखादिभ्यः क
र्मभ्यो वेदनायामर्थे क्यङ् स्यात्॥ वेदनाकर्त्तुरेव चेत् सुखादीनि स्युः॥ सुखं वेदयते सुखायते॥ कर्त्तृग्रहणं किं
परस्य सुखं वेदयते॥ नमोवरिवश्चित्रङः क्यच्॥ करण इत्यनुवर्त्तते क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये
च॥ नमस्यति देवान्॥ पूजयतीत्यर्थः॥ वरिवस्यति गुरून्॥ शुश्रूषत इत्यर्थः॥ चित्रीयते॥ विस्मयत इत्यर्थः॥

सि०कौ०

॥१०१॥

विस्मापयते इत्यन्ये॥ पुच्छभाण्डचीवराण्णिङ्॥ पुच्छादुदसने व्यसने पर्यसने च॥ विविधं विक्षेपणं व्यसनं॥ उत्पु
च्छयते॥ विपुच्छयते॥ परिपुच्छयते॥ भाण्डात्समाचयने॥ संभाण्डयते॥ भाण्डानि समाचिनोति राशीकरोतीत्यर्थः॥ समभाण्
डत॥ चीवरादर्जने परिधाने च॥ संचीवरयते भिक्षुः॥ चीवराण्यर्जयति परिधत्ते वेत्यर्थः॥ मुण्डमिश्रश्लक्ष्णलवणव
व्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्॥ करणार्थे॥ मुण्डं करोति मुण्डयति॥ व्रताद्भोजने तन्निवृत्तौ च॥ पयः शूद्रान्नं वा
व्रतयति॥ वस्त्रात्समाच्छादने॥ संवस्त्रयति॥ हलादिभ्यो ग्रहणे हलिकल्योरदन्तत्वं च निपात्यते॥ हलिं कलिं [illegible]
गृह्णाति हलयति॥ कलयति॥ महद्धलं हलिः॥ परत्वाद्वृद्धौ सत्यामपि वृद्धावेनागेव लुप्यते॥ अत एव सन्वद्भावदीर्घौ न॥ अजहलत्॥ अचे
कलत्॥ कृतं गृह्णाति कृतयति॥ तूस्तानि विहन्ति वितूस्तयति॥ तूस्तं केशा इत्येके॥ जटीभूताः केशा इत्यन्ये॥ पापमित्यपरे॥ मुण्डादयः॥ सत्यापेत्यत्रैव
संयुक्ताः॥ प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योपि णिजर्थं॥ मुण्डयति माणवकं मिश्र
यत्यन्नं॥ श्लक्ष्णयति वस्त्रं॥ लवणयति व्यंजनमिति॥ हलकल्योरदन्तार्थं सत्यस्य पुगर्थं॥

नि
च

॥१०१॥

णि

केषांचित्तु प्रपंचार्थं॥ सत्यं करोत्याचष्टे वा सत्यापयति॥ अर्थवेदयोरप्यापुग्वक्तव्यः॥ अर्थापयति॥ वेदापय
ति॥ पाशाद्विमोचने॥ विपाशयति॥ रूपयति॥ वीणयोपगायति उपवीणयति॥ तूलेनानुकुष्णाति अ
नुतूलयति॥ तूणाय तूलेनानु घटयतीत्यर्थः॥ श्लोकैरुपस्तौति उपश्लोकयति॥ सेनयाभियाति
अभिषेणयति उपसर्गात्सुनोतीति षः॥ अभ्यषेणयत्॥ प्राक्सितादिति षः॥ अभिषिषेणयिषति॥ स्थादि
ष्विति षः॥ लोमान्यनुमार्ष्टि अनुलोमयति॥ त्वचं संवरणे॥ त्वचं गृह्णाति त्वचयति॥ वर्मणा संनह्यति संवर्मयति॥
वर्णं गृह्णाति वर्णयति॥ चूर्णैरवध्वंसते अवचूर्णयति॥ इष्ठवदित्यतिदेशात्पुंवद्भावादयः॥ एनीमाचष्टे एतयति॥
दरदमाचष्टे दरदयति॥ पृथुं प्रथयति॥ रऋतो सत्यां पूर्ववाटिलोपः॥ अपिप्रथत्॥ अपप्रथत्॥ मृदुं म्रदयति॥ अमि
म्रदत्॥ अममृदत्॥ भृशं दृढं भ्रशयति॥ क्रशयति॥ दृढयति॥ अबभ्रशत्॥ अचक्रशत्॥ अददृढत्॥ परिद्र
ढयति॥ पर्यवद्रढत्॥ ऊढिमाख्यत् औजिढत्॥ इत्यादीनामसिद्धत्वाद्भवति शब्दस्य द्वित्वं॥ पूर्वत्रासिद्धीयमद्वित्वे

सि॰कौ॰
१०२.

इतितुनित्यमित्यकं ढत्यस्यद्वित्वमित्युक्तं॥ औडिढत्। ऊढमाख्यत्। औजढत्। ओ ऊढ्... ओःपुयणिजि सूत्रे
पर्गप्रत्याहारग्रहणाल्लिंगाद्वित्वेकार्येणावचआदेशोनेति ऊनयत्। उत्कं॥ प्रकृत्यैकाच्॥ वृद्धिपुकौ स्वापयति॥
त्वामांवाआचष्टेत्वापयति॥ मापयति॥ मपर्यन्तस्यत्वमौ॥ पररूपात्पूर्वं नित्यत्वाट्टिलोपः। वृद्धिः पुक्त्वादयानिमाद्य
तिशतितुन्याय्यं॥ अंतरंगत्वात्पररूपेकृते प्रकृत्यैकाजिति प्रकृतिभावात्॥ नच प्रकृतिभावो भाष्येप्रत्याख्यात इति भ्रमित
व्यं॥ भाष्यस्य प्रेष्ठाद्युदाहरणविशेषे अन्यथासिद्धिपरत्वात्॥ युवाम् आवां वा युष्मयति॥ अस्मयति॥ श्वानमाचष्टे शावय
ति॥ नस्तद्धित इति टिलोपः॥ प्रकृतिभावस्तु न॥ येननाप्राप्तिन्यायेन टेरित्यस्यैव बाधकोस्तु॥ भत्वात्संप्रसारणं॥ अ
न्येतु नस्तद्धित इति तु नेहातिदिश्यते॥ इष्ठनि तस्यादृष्टत्वात्॥ प्रष्ठिष्ठ इत्यादौ परत्वाट्टेरित्यस्यैव प्रवृत्तेः॥ तेन शून
यतीतिरूपमाहुः॥ विद्वांसमाचष्टे विद्वयति। अंगवृत्तपरिभाषयासंप्रसारणंनेत्येके॥ संप्रसारणे कृते आवावादेशे च। वि
द्वावयतीत्यन्ये॥ नित्यत्वाट्टिलोपात्प्राक् संप्रसारणं॥ अंतरंगत्वात्पूर्वरूपे टिलोपः॥ विदयतीत्यपरे॥ उदंचमाचष्टे उदी
चयति॥ उदैचिचत्॥ प्रत्यंचं प्रतीचयति। प्रत्यचिचत्॥ इकोसवर्णे इति प्रकृतिभावपक्षे प्रतिअचिचत्॥ सम्यंचमाचष्टे

य

समीचयति। सम्यचिचत्॥ समिअचिचत्॥ तिर्यंचमाचष्टे तिराययति। अंचेष्टिलोपेनापहारेपि बहिरंगत्वेनासिद्धत्वात्तिर
सत्तिरिः॥ असिद्धवदत्रेति चिणोलुकृन्यायेन प्रथमटिलोपोसिद्धः॥ अतः पुनष्टिलोपोन॥ अंगवृत्तपरिभाषया वा॥ चङि अ
ग्लोपित्वादुपधाह्रस्वोन॥ अतितिरायत्॥ सध्र्यंचमाचष्टे सध्र्यायति। अससध्रायत्॥ विष्वद्र्यंचं। अविविष्वद्रायत्॥
देवद्र्यंचं। अदिदेवद्रायत्॥ अदद्र्यंचं। आददद्रायत्। अमुद्र्यंचं। आमुमुद्रायत्॥ अमुमुयञ्चं। अमुमुआययति। चङ्
मु अमुमुआयत्। अदमुयञ्चं। अदमुआययति॥ आददमुआयत्॥ भुवंभावयति। अबीभवत्॥ भुवं। अबुभवत्। श्रियं।
अशिश्रयत्। गां। अजूगवत्। रायं। अरीरयत्॥ नावं। अनूनवत्॥ स्वश्वं स्वाशश्वत्। स्वः अव्ययानां भमात्रे टिलोपः। स्वय
ति। अससस्वयत्॥ असिस्वत्। बहून् भावयति। बहयतीत्यन्ये। स्रग्विणं। स्रजयति। संज्ञापूर्वकत्वान्न वृद्धिः॥ श्रीमतीं श्री
मंतं वा श्राययति। अशिश्रयत्। पयस्विनीं पयसयति॥ इह टिलोपोन। तद्रूपवाहस्य लुकः प्रसक्तत्वात्॥ स्थूलं। स्थवयति॥
दूरं। दवयति। कथं तर्हि दूरयति। दूरं अतति अयतेर्वा॥ दूराद्दूरायतं कुर्वतीत्यर्थः॥ युवानं युवयति। कनयति। युवाल्प
योरितिवा कन्॥ अंतिकं नेदयति॥ बाढं साधयति॥ प्रशास्यं। प्रशास्ययति। इह अज्योन। उपसर्गस्य पृथक्कृतेः। दृढ

ज्यापयति॥ वर्षयति। प्रियं प्रापयति॥ स्थिरं स्थापयति। स्फिरं स्फापयति। उरुं वरयति॥ वारयति। बहुलं बंहयति॥ गुरुं गरय
ति। तृप्रं त्रपयति। दीर्घं द्राघयति। वृंदारकं वृंदयति॥ ॥ इतिनामधातुप्रक्रिया॥ ॥ कंड्वादिभ्यो यक्॥ एभ्यो धातुभ्यो नि
त्यं यक् स्यात्स्वार्थे॥ धातुभ्यः किं। प्रातिपदिकेभ्यो माभूत्॥ द्विधा हि कंड्वादयः॥ धातवः प्रातिपदिकानि च॥ कंडूञ् गात्र
विघर्षणे॥ कंडूयति। कंडूयते॥ मंतु अपराधे। रोषण इत्येके। मंतूयति। वल्गु पूजामाधुर्य
योः। वल्गूयति। असु उपतापे। असू असुञ् इत्येके। अस्यति। असूयति। असूयते। लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च। दीप्ता
वित्येके। लेट्यति। लोट्यति। लेटिता। लोटिता। लेलादीते। इरस् इरज् इरञ् ईर्ष्यायां॥ इरस्यति। इरज्यति। हलि चेति दीर्घः
ईर्यति। ईर्यते। उपस् प्रभातीभावे। वेट् धौर्त्ये स्वप्ने च। मेधा आशुग्रहणे। मेधायति। कुषुभ क्षेपे। कुषुभ्यति। मगध परिवे
ष्टने। नीचदास्य इत्यन्ये। तंतस् पंपस् दुःखे। सुख दुःख तत्क्रियायां। सुख्यति। दुख्यति। सुखं दुःखं चानुभवतीत्यर्थः।
सपर पूजायां॥ अरर आराकर्मणि॥ भिषज् चिकित्सायां। भिष्णज् उपसेवायां। इषुध शरधारणे। चरण चरण गतौ। चुरण
चौर्ये। तुरण त्वरायां। भुरण धारणपोषणयोः। गद्गद् वाक्स्खलने। एला केला खेला विलासे। इलेत्यन्ये। खेला स्खलने च। अदं
सपर पूजायां। महीङ् पूजायां। महीयते।
तीयमित्यन्ये। लेख्यति। लिट अल्पकुत्सनयोः॥ लिट्यति। लाट जीवने। हृणीङ् रोषणे लज्जायां च॥ महीङ् पूजायां। महीयते।

पूजां लभते इत्यर्थः॥ रेखा श्लाघासादनयोः॥ इरस् परितापपरिचर्यायोः॥ तिरस् अंतर्धौ। अगद नीरोगत्वे। उरस् बलार्थः॥
उरस्यति। बलवान् भवतीत्यर्थः॥ तरण गतौ। पयस् प्रसृतौ। संभूयस् प्रभूतभावे। अंबर संबर संभरणे। आकृतिगणोयं॥
॥ इतिकंड्वादयः॥ ॥ कंडूयतेः सन्। सन्यङोरिति प्रथमस्यैकाचो द्वित्वे प्राप्ते। कंड्वादेस्तृतीयस्येति वाच्यं॥ कंडूयियिषति।
क्यजंतात्सन्॥ यथेष्टं नामधातुषु। आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः॥ अजादेस्त्वाद्यतरस्य। पुपुत्रीयिषति।
पुतित्रीयिषति। पुत्रीयियिषति। अशिश्वीयिषति। अश्वीयियिषति॥ नदराणां संयुक्तानां अचः परस्यैव द्वित्वनिषेधः॥
इंद्रीयतेः सन्। द्रीशब्दयिशब्दयोरन्यतरस्य द्वित्वं॥ इंदिद्रीयिषति। इंद्रीयियिषति। चिचंद्रीयिषति। चंदिद्रीयिषति।
प्रियमाख्यातुमाचक्षाणां प्रेरयितुं वेच्छति॥ पिप्रापयिषति। प्रापिपयिषति। प्रापयियिषति। उरुं विवारयिषति। वारिरयि
षति। वारेरियिषति। बाढं सिसाधयिषतीत्यादि रूपत्रयं॥ षत्वं तु नास्ति। आदेशो यः सकार इत्युक्तेः॥ यङ् सन् ण्यंतात्
सन्। बोभूयिषयिषति। यङ् णिच् सन्नंतात् णिच्। बोभूययिषयति। इत्यादि॥ इतिप्रत्ययमाला॥ ॥ अनुदात्तङित
आत्मनेपदं॥ आस्ते। शेते। भावकर्मणोः॥ बभूवे। अनुबभूवे। कर्तरि कर्मव्यतिहारे॥ क्रियाविनिमये द्योत्ये कर्तर्यात्म

व्य

नेपदंस्यात्॥ व्यतिलुनीते॥ अन्यस्ययोग्यंलवनंकरोतीत्यर्थः॥ श्नसोरल्लोपः॥ व्यतिस्ते॥ व्यतिषाते॥ व्यतिषते॥ ता
सस्योर्लोपः॥ व्यतिसे॥ धि च॥ व्यतिध्वे॥ हएति व्यतिहे व्यत्ययसे व्यत्यास्त॥ व्यतिशीत॥ व्यतिराते॥ व्यतिभाते॥ न
व्यतिवभे॥ न गतिहिंसार्थेभ्यः॥ [illegible]तिगछंति॥ व्यतिघ्नंति॥ प्रतिषेधे हसादीनामुपसंख्यानं॥ हसादयो हस
प्रकाराः॥ शब्दक्रियाः॥ व्यतिहसंति॥ व्यतिजल्पंति॥ हरतेरप्रतिषेधः॥ संप्रहरंते राजानः॥ इतरेतरा
न्योन्योपपदाच्च॥ परस्परोपपदाच्चेति वक्तव्यं॥ इतरेतरान्योन्यस्यपरस्य वा व्यतिलुनंति॥ नेर्विशः॥
निविशते। परिव्यवेभ्यः क्रियः॥ अकर्त्रभिप्रायार्थमिदं॥ परिक्रीणीते। विक्रीणीते। अवक्रीणीते। विपराभ्यांजेः॥ वि
जयते। पराजयते। आङो दोनास्यविहरणे॥ आङ्पूर्वाद्ददातेर्मुखविकसनादन्यत्रार्थेवर्त्तमानादात्मनेपदंस्यात्॥ विद्यामाद
त्ते॥ अनास्यग्रहणे किं॥ मुखंव्याददाति॥ आस्यग्रहणमविवक्षितं॥ विपादिकांव्याददाति॥ पादस्फोटो विपादिका॥ नदीकूलंव्या
ददाति॥ परांगकर्मकान्ननिषेधः॥ व्याददते पिपीलिकाः पतंगस्य मुखं॥ क्रीडोनुसंपरिभ्यश्च॥ चादाङः॥ अनुक्रीडते। संक्रीडते। प
रिक्रीडते। आक्रीडते। अनोः कर्मप्रवचनीयान्न॥ उपसर्गेणसमासाहचर्यात्॥ माणवकमनुक्रीडति॥ तेनसहेत्यर्थः॥ तृतीया

र्थ इत्यनोः कर्मप्रवचनीयत्वं॥ समोकूजने। संक्रीडते। कूजनेतुसंक्रीडतिचक्रं॥ आगमेःक्षमायां॥ ण्यंतस्येदंग्रहणं॥ आगमयस्वता
वत्॥ मात्वरिष्ठा इत्यर्थः॥ शिक्षेर्जिज्ञासायां॥ धनुषिशिक्षते॥ धनुर्विषये शक्तो भवितुमिछतीत्यर्थः॥ आशिषिनाथः॥ आशिष्येवे
तिनियमार्थंवार्त्तिकमित्युक्तं॥ सर्पिषोनाथते। सर्पिर्मेस्यादिति॥ आशास्त इत्यर्थः॥ कथंतर्हिनाथसेकिमुपतिंनभूभृतामिति॥ ना
धस इतिपाठ्यं॥ हरतेर्गतताछील्ये॥ गतस्प्रकारः॥ पैतृकमश्वा अनुहरंते॥ मातृकंगावः॥ पितुर्मातुश्च गतंप्रकारं
परिशीलयंतीत्यर्थः॥ ताछील्येकिं॥ मातुरनुहरति॥ किरतेर्हर्षजीविकाकुलायकरणेषुवाच्यं॥ हर्षादयो विषयाः
तत्रहर्षोविक्षेपस्यकारणं॥ इतरफलं॥ अपाच्चतुष्पाच्छकुनिष्वालेखने॥ अपात्किरतेः सुट्स्यात्॥ स्कड
पिहर्षाद्येष्विववक्तव्यः॥ अपस्किरतेवृषोहृष्टः॥ कुक्कुटोभक्षार्थी॥ श्वाआश्रयार्थी च॥ हर्षादिष्विति किं॥ अपकि
रतिकुसुमं॥ इहतङ्सुटौन॥ हर्षादिमात्रविवक्षायां यद्यपितङ् प्राप्तस्तथापि सुड्भावेनैष्यत इत्याहुः॥ ग
जोपकिरति॥ ओडिन्नुप्रछयोः॥ आनुते। आपृछते॥ उपपराभ्यां॥ आक्रोशार्थात्स्वरितेतो ऽकर्तृगेपिफ
[illegible]ले शपथरूपेर्थे आत्मनेपदंवक्तव्यमित्यर्थः॥ रू[illegible]यशपते॥ समवप्रविभ्यस्थः॥ संतिष्ठते।

६७

स्थाघ्वोरिच्च॥ समस्थित। समस्थिषातां। समस्थिषत। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। आङः प्रतिज्ञायामुपसंख्यानं॥ शब्दं नित्य
मातिष्ठते। नित्यत्वेन प्रतिजानीत इत्यर्थः॥ प्रकाशनस्थेयाख्ययोश्च॥ गोपी कृष्णायतिष्ठते। स्वाशयं प्रकाशयत इत्यर्थः॥ संशय्य
कर्णादिषुतिष्ठते यः॥ कर्णादीन्निर्णेतृत्वेनाश्रयति इत्यर्थः॥ उदोनूर्ध्वकर्मणि॥ मुक्तावुत्तिष्ठते। अनूर्ध्वे किं। पीठादुत्तिष्ठति। इह
यामेव। नेह ग्रामाच्छतमुत्तिष्ठति॥ उपान्मंत्रकरणे॥ आग्नेय्याग्नीध्रमुपतिष्ठते। मंत्रकरणे किं। भर्त्तारमुपतिष्ठति यौवनेन॥
उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यं। आदित्यमुपतिष्ठते। कथं तर्हि स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्व
तीति। देवतात्वारोपात्। नृपस्य देवतांशत्वाद्वा॥ गंगा यमुनामुपतिष्ठते॥ उपश्लिष्यतीत्यर्थः॥ रथिकानुपतिष्ठते॥ मित्रीकरो
तीत्यर्थः॥ पंथाः स्रुघ्नमुपतिष्ठते॥ प्राप्नोतीत्यर्थः॥ वा लिप्सायामिति वक्तव्यं॥ भिक्षुकः प्रभुमुपतिष्ठते। उपतिष्ठति वा। लिप्स
योपगच्छतीत्यर्थः॥ अकर्मकाच्च॥ उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्॥ भोजनकाले उपतिष्ठते। सन्निहितो भवतीत्यर्थः॥
उद्विभ्यां तपः॥ अकर्मकादित्येव। उत्तपते। वितपते। दीप्यत इत्यर्थः॥ स्वांगकर्मकाच्चेति वक्तव्यं॥ स्वं अंगं स्वांगं न तु द्रवमिति प
रिभाषितं॥ उत्तपते वितपते वा पाणिं॥ नेह सुवर्णमुत्तपति। संतापयति विलापयति वा इत्यर्थः॥ चैत्रो मैत्रस्य पाणिमुत्तपति॥

संतापयति इत्यर्थः॥ आङो यमहनः॥ आयच्छते। आहते। अकर्मकात्स्वांगकर्मकादित्येव। नेह परस्य शिरः आहंति। आहतः।
आघ्नंति। कथमाजघ्ने विषमलोचनस्य वक्षः इति भारविः। आहध्वं मा रघूत्तममिति भट्टिश्च॥ प्रमाद एवायमिति भागवृत्तिः।
प्राप्येत्यध्याहारो वा॥ ल्यब्लोपे पंचमीति। तुल्यबलं विनैव तदर्थावगतिर्यत्र तद्विषयकं। भेत्तुमित्यादि तुमुन्नताध्याहारो वास्तु॥
समीपमेत्येति वा॥ आत्मनेपदेष्वन्यतरस्यां॥ हनो वधादेशो वा स्याल्लुङि॥ अवधिष्ट। हनः सिच्॥ कित्स्यात्॥ अनुनासि
कलोपः। आहत। आहसातां। आहसत॥ यमो गंधने। सिच् कित्स्यात्॥ गंधनं सूचनं॥ परदोषाविष्करणं। उदायत। उदा
यसातां। गंधने किं। उदायंस्त पादं। आकृष्टवानित्यर्थः। समो गम्यृच्छिभ्यां॥ अकर्मकाभ्यामित्येव। संगच्छते। वा गमः॥ गमः
परो झलादी लिङ्सिचौ वा कितौ स्तः। संगसीष्ट। संगंसीष्ट। समगत। समगंस्त। समृच्छिष्यते। अकर्मकाभ्यां किं। ग्रामं सं
गच्छति॥ विदिप्रच्छिस्वरतीनामुपसंख्यानं॥ वेत्तेरेव ग्रहणं। संवित्ते। संविदाते। वेत्तेर्विभाषा॥ वेत्तेः परस्य झादेशस्यातो रुडाग
मो वा स्यात्। संविद्रते। संविदते। संविदतां। संविद्रतां। समविद्रत। समविदत। संपृच्छते। संस्वरते। अर्त्तिश्रुदृशिभ्यश्चेति व
क्तव्यं। अर्त्तीति द्वयोर्ग्रहणं। अङ्विधौ त्वियर्त्तेरेवेत्युक्तं। मा समृत। मा समृषातां। मा समृषत। समार्त्त। समार्षातां। समार्ष

तेतिचञ्चादेः। इयर्त्तेस्तु मा समरत। मा समरेतां। मा समरंतेति। समारत। समारेतां। समारंतेतिच। ~~अत्र~~ ~~संज्ञोपसर्जनीभूतास्तु न सर्वादयः~~॥
संशृणुते। संपश्यते। अकर्मकादित्येव। अत एव रक्षांसीति पुरापि संशृणुमहे इति मुरारिप्रयोगः प्रामादिक इत्याहुः। अध्या
हारो वेति कथयन्त्यइति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेच्छृणु। धातोरर्थांतरे वृत्तेर्धात्वर्थेनो
पसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥१॥ वहति भारं। नदी वहति। स्यंदत इत्यर्थः। जीवति। नृत्यति। प्रसिद्धे
र्यथा। मेघो वर्षति। कर्मणो विवक्षातो यथा। हितान्न यः संशृणुते स किंप्रभुः॥ उपसर्गादस्यत्यूह्योर्वेति वाच्यं। अकर्मकादिति
निवृत्तं॥ बंधं निरस्यते निरस्यति॥ समूहते समूहति॥ उपसर्गाद्ध्रस्व ऊहतेः॥ या दोह्यिति॥ ब्रह्मस
मुह्यात्। उज्जग्निं समुह्य॥ निसमुपविभ्यो ह्वः॥ निह्वयते॥ स्पर्धायामाङः॥ कृष्णश्चाणूरमाह्व
यते॥ स्पर्धायां किं। पुत्रमाह्वयति॥ गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगे
षु कृञः॥ गंधनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव॥ अवक्षेपणं भर्त्सनं। श्येनो वर्तिकामु
त्कुरुते। भर्त्सयत इत्यर्थः॥ हरिमुपकुरुते। सेवत इत्यर्थः॥ परदारान्प्रकुरुते। तेषु सहसा प्रवर्त्तते। एधोदकस्योपस्कुरुते। गुणमा

धत्ते। गाथाः प्रकुरुते। प्रकथयति। शतमुपकुरुते। धर्मार्थं विनियुंक्ते। एषु किं। घटं करोति। अधेः प्रसहने। प्रसहनं क्षमाभिभवश्च।
षह मर्षणेऽभिभवे चेति पाठात्। शत्रुमधिकुरुते। क्षमत इत्यर्थः। अभिभवतीति वा। वेः शब्दकर्मणः॥ स्वरान्विकुरुते। उच्चार
यतीत्यर्थः। शब्दकर्मणः किं। चित्तं विकरोति कामः। अकर्मकाच्च॥ वेः कृञ इत्येव। छात्रा विकुर्वते। विकारं लभंते। संमाननोत्सञ्ज
नाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥ अत्रोत्संजनज्ञानविगणनव्ययाः नयतेर्वाच्याः। इतरे प्रयोगोपाधयः। तथाहि
शास्त्रे नयते। शास्त्रस्थं सिद्धांतं शिष्येभ्यः प्रापयतीत्यर्थः॥ तेन शिष्यसंमाननं फलितं। उत्संजने। दंडमुन्नयते। उत्क्षिपती
त्यर्थः॥ माणवकमुपनयते। विधिनात्मसमीपं प्रापयतीत्यर्थः। उपनयनपूर्वकेण ह्यध्यापनेन हि उपनेतरि आचार्यत्वं
क्रियते। ज्ञाने। तत्त्वं नयते॥ निश्चिनोतीत्यर्थः॥ कर्मकरानुपनयते॥ भृतिदानेन स्वसमीपं प्रापय
तीत्यर्थः॥ विगणनं ऋणादेर्निर्यातनं। करं विनयते॥ राज्ञे देयं भागं परिशोधयतीत्यर्थः॥
शतं विनयते॥ धर्मार्थं विनियुंक्त इत्यर्थः॥ कर्तृस्थे चाशरीरे कर्मणि॥ नियः कर्तृस्थे यदात्मनेपदं प्राप्तं तच्छरीरावयव
भिन्न एव स्यात्॥ सूत्रे शरीरशब्देन तदवयवो लक्ष्यते॥ क्रोधं विनयते॥ अपगमयति॥ तत्फलस्य चित्तप्रसादस्य

कर्तृगत्वात्स्वरितजित इत्येव सिद्धे नियमार्थमिदं ॥ तेनेह न। गडुं विनयति। कथं विगणय्य नयंति पौरुषमिति भारविः॥ कर्तृगामित्वाविवक्षायां भविष्यति॥ वृत्तिसर्गतायनेषु क्रमः॥ वृत्तिरप्रतिबंधः। ऋचि क्रमते। बुद्धिर्न प्रतिहन्यत इत्यर्थः॥ सर्ग उत्साहः। अध्ययनाय क्रमते। उत्सहते। क्रमंतेऽस्मिन् शास्त्राणि॥ स्फीतानि भवंतीत्यर्थः॥ उपपराभ्यां॥ वृत्त्यादिष्वाभ्यामेव क्रमे॥ नतु उपसर्गांतरपूर्वात्। उपक्रमते। पराक्रमते। नेह संक्रामति। आङ उद्गमने॥ आक्रमते सूर्यः। उदयत इत्यर्थः। ज्योतिरुद्गमन इति वक्तव्यं॥ नेह। आक्रमति धूमो हर्म्यतलात्। वेः पादविहरणे। साधु विक्रमते वाजी॥ पादविहरणे किं। विक्रामति संधिः॥ द्विधा भवतीत्यर्थः। प्रोपाभ्यां समर्थाभ्यां॥ समर्थौ तुल्यार्थौ॥ शब्दध्वादिलासरूपं। प्रारंभे अनयोस्तुल्यार्थता। प्रक्रमते। उपक्रमते। समर्थाभ्यां किं॥ प्रक्रामति। गच्छतीत्यर्थः। उपक्रामति। आगच्छतीत्यर्थः॥ अनुपसर्गाद्वा॥ क्रमते। क्रामति। अप्राप्तविभाषेयं। वृत्त्यादौ तु नित्यमेव॥ अपह्नवे ज्ञः॥ शतमपजानीते॥ अपलपतीत्यर्थः॥ अकर्मकाच्च॥ सर्पिषो जानीते॥ सर्पिषा उपायेन प्रवर्तत इत्यर्थः॥

स्फुटवी॰

संप्रतिभ्यामनाध्याने॥ शतं जानीते। अवेक्षत इत्यर्थः। शतं प्रतिजानीते। अंगीकरोतीत्यर्थः॥ अनाध्यान इति योगो विभज्यते। तत्सामर्थ्यादकर्मकाच्चेति प्राप्तिरपि वार्यते। मातरं मातुर्वा संजानीते। कर्मणः शेषत्वविवक्षायां षष्ठी। भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः॥ उपसंभाषणोपमंत्रणे धातोर्वाच्ये॥ इतरे प्रयोगोपाधयः॥ शास्त्रे वदते। भासमानो ब्रवीतीत्यर्थः। उपसंभाषोपसांत्वनं। भृत्यानुपवदते। सांत्वयतीत्यर्थः। ज्ञाने शास्त्रे वदते। यत्ने क्षेत्रे वदते। विमतौ क्षेत्रे विवदंते। उपमंत्रणमुपच्छंदनं। उपवदते। प्रार्थयत इत्यर्थः। व्यक्तवाचां समुच्चारणे॥ मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात्॥ संप्रवदंते ब्राह्मणाः। नेह। संप्रवदंति खगाः। अनोरकर्मकात्॥ व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात्। अनुवदते कठः कलापस्य। अकर्मकात्किं। उक्तमनूद्यति। व्यक्तवाचां किं। अनुवदति वीणा। विभाषा विप्रलापे॥ विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं स्यात्। विप्रवदंते विप्रवदंति वा वैद्याः। अवाद्ग्रः॥ अवगिरते। गृणातिस्त्ववपूर्वो न प्रयुज्यत इति भाष्यं। समः प्रतिज्ञाने॥ शब्दं नित्यं संगिरते। प्रतिजानीत इत्यर्थः। प्रतिज्ञाने किं। संगिरति ग्रासं। उदश्चरः सकर्मकात्॥ धर्ममुच्चरते। उल्लंघ्य गच्छतीत्यर्थः। सकर्मकात्किं। बाष्पमुच्चरति। उपरिष्टात् गच्छतीत्यर्थः। समस्तृतीयायुक्तात्॥ रथेन संचरते। दाणश्च सा

चेच्चतुर्थ्यर्थे ॥ संपूर्वाद्दाणस्तृतीयांतेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे॥ दास्यासंयच्छते। पूर्वसूत्रे सम इति षष्ठी तेन रु
च द्वयमिदं व्यवहितेपि प्रवर्त्तते। रथेन समुदाचरते। दास्यासंप्रयच्छते। उपाद्यमः स्वकरणे। स्वकरणं स्वीकारः॥ भार्यामुपय
च्छते। विभाषोपयमने॥ यमः सिच् कितद्वा विवाहे। रामः सीतामुपायत। उपायंस्त वा। उदवोढेत्यर्थः। गंधनागे उपयमने
तु पूर्वविप्रतिषेधान्नित्यं किल्वं॥ ज्ञाश्रुस्मृदृशां सनः॥ सन्नंतानामेषां प्राग्वत्॥ धर्मं जिज्ञासते। शुश्रूषते। सुस्मूर्षते। दिदृ
क्षते। नानोर्ज्ञः॥ पुत्रमनुजिज्ञासति। पूर्वसूत्रस्यैवायं निषेधः॥ अनंतरस्येति न्यायात्॥ तेनेह न। सर्पिषोनुजिज्ञासते।
सर्पिषा प्रवर्त्तितुमिच्छतीत्यर्थः। पूर्ववत्सन इति तङ्। अकर्मकाच्चेति केवलाद्विधानात्॥ प्रत्याङ्भ्यां श्रुवः॥ आभ्यां सन्नंता
च्छ्रुव उक्तं न स्यात्॥ प्रतिशुश्रूषति। आशुश्रूषति। कर्मप्रवचनीयात्तु स्यादेव। देवदत्तं प्रति शुश्रूषते। शदेः शितः॥ म्रि
यतेर्लुङ्लिङोश्च। व्याख्यातं। पूर्ववत्सनः॥ सनः पूर्वो यो धातुस्तेन रतुल्यं सन्नंदत्यात्मनेपदं स्यात्॥ शिशयिषते। निवि
विक्षते॥ पूर्ववदिति किं। बुभूषति। शदेरित्यादि सूत्रद्वये सनो नेत्यनुवर्त्यवाक्यभेदेन व्याख्येयं॥ तेनेह न। शिशत्सति॥

० अपरिस्पंदनसाधनसाध्यो भावः। सपरिस्पंदनसाधनसाध्या क्रिया॥ ०

मुमूर्षति॥ आम्प्रत्ययवत्कृञोनुप्रयोगस्य॥ एधांचक्रे। प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ प्रयुंक्ते। उपयुंक्ते। स्वरा
द्यंतोपसर्गादिति वक्तव्यं। उद्युङ्क्ते। नियुंक्ते। अयज्ञपात्रेषु किं। द्वंद्वं न्यंचि। यज्ञपात्राणि प्रयुनक्ति॥ समः
क्ष्णुवः॥ संक्ष्णुते शस्त्रं। भुजोनवने॥ ओदनं भुंक्ते। अभ्यवहरतीत्यर्थः॥ बुभुजे पृथिवीपालः पृथिवीमेव केव
लां। वृद्धो जनो दुःखशतानि भुंक्ते। इहोपभोगो भुजेरर्थः॥ अनवने किं। महीं भुनक्ति॥ णेरणौ यत्कर्म णौ चे
त्स कर्त्तानाध्याने॥ ण्यंतादात्मनेपदं स्यात् अणौ या क्रिया सैव चेण्ण्यंतेनोच्यते॥ अणौ यत्कर्मकारकं स चेण्णौ क
र्त्ता स्यात्॥ न त्वाध्याने॥ णिचश्चेति सिद्धे अकर्त्रभिप्रायार्थमिदं॥ कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पे प्रा
प्ते अणावकर्मकादिति परस्मैपदं च परत्वात्प्राप्तं पूर्वविप्रतिषेधेनेदमेवेष्यते। कर्त्तृस्थभावकाः कर्त्तृस्थक्रि
याश्चोदाहरणं॥ तथाहि॥ पश्यंति भवं भक्ताः॥ चाक्षुषज्ञानविषयं कुर्वंतीत्यर्थः॥ प्रेरणांशत्यागे। पश्यति
भवः। विषयो भवतीत्यर्थः। ततो हेतुमण्णिचि दर्शयंति भवं भक्ताः। पश्यंतीत्यर्थः॥ पुनर्ण्यर्थस्याविवक्षायां
दर्शयते भवः॥ इह प्रथमतृतीययोः कर्त्तृस्थयोर्द्वितीयचतुर्थयोश्च तुल्योर्थः॥ अत्र तृतीयकक्ष्यायां न तङ्।

कर्मणो

क्रियासाम्येपि णौ कर्मकारकस्य णौ कर्तृत्वाभावात्॥ चतुर्थ्यां तु तङ्॥ द्वितीयामाश्रित्य क्रियासा
म्यात्। प्रथमायां भवत्येव कर्तृत्वाच्च॥ एवमारोहयते हस्तीत्यत्रोदाहरणं॥ आरोहंति हस्तिनं हस्तिपकाः। न्यकू
भावयंतीत्यर्थः॥ ततः आरोहति हस्ती। न्यकूभवतीत्यर्थः। ततो णिच्। आरोहयंति। आरोहंतीत्यर्थः। तत आरो
हयते। न्यकूभवतीत्यर्थः। यद्वा पश्यंत्यारोहंतीति प्रथमकक्ष्या प्राग्वत्। ततः कर्मण एव हेतुत्वारोपाण्णिच्। द
र्शयति भवः। आरोहयति हस्ती। पश्यत आरोहतश्च प्रेरयतीत्यर्थः। ततो णिजंताभ्यां तत्प्रकृतिभ्यां चोपात्तयोर्द्वयो
रपि प्रेरणयोस्त्यागे दर्शयते। आरोहयते इत्युदाहरणं। अर्थः प्राग्वत्। अस्मिन्पक्षे द्वितीयकक्ष्यायां न तङ्॥
समानक्रियत्वाभावात्। णिजर्थस्याधिक्यात्॥ अनाध्याने किं। स्मरति वनगुल्मं कोकिलः। स्मरयति वनगु
ल्मः। उत्कंठापूर्वकस्मृतेर्विषयो भवतीत्यर्थः। भीस्म्योर्हेतुभये॥ व्याख्यातं। गृधिवंच्योः प्रलंभने। प्रतारणा
र्थयंताभ्यां प्राग्वत्। माणवकं गर्धयते। वंचयते। प्रलंभने किं। श्वानं गर्धयति। अभिकांक्षामस्योत्पादयती
त्यर्थः। लियः संमाननशालीनीकरणयोश्च। व्याख्यातं। मिथ्योपपदात्कृञोभ्यासे। णेरित्येव। पदं मिथ्या कारय
ति। स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदात्किं। पदं सुष्ठु कारयति। अभ्यासे किं। सकृत्पदं कार

ति

यति॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले। यजते। कुरुते। कर्त्रभिप्राये किं। ऋत्विजो यजंति॥ सुन्वंति॥ अ
पाद्वदः। न्यायमपवदते। कर्त्रभिप्राय इत्येव। अपवदति। णिचश्च। कारयते। समुदाङ्भ्यो यमोग्रं
थे। अग्रंथ इति छेदः। व्रीहीन्संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते। अग्रंथे किं। उद्यच्छति वेदं। अ
धिगंतुमुद्यमं करोतीत्यर्थः। कर्त्रभिप्राय इत्येव। अनुपसर्गाज्ज्ञः॥ गां जानीते॥ अनुपसर्गात्किं॥
स्वर्गं लोकं न प्रजानाति॥ कथं तर्हि उक्तिः। इत्थं नृपः पूर्वमवालुलोचे ततोनुजज्ञे गमनं सुतस्येति॥
कर्मणि लिट्। न पेणेति विपरिणामः॥ विभाषोपपदेन प्रतीयमाने॥ स्वरितञित इत्यादि
पंचसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं य
ज्ञं यजति स्वं यज्ञं यजते वा। स्वं कटं करोति कुरुते वा। स्वं पुत्रं अपवदति अपवदते वा। स्वं यज्ञं कारयति का
रयते वा। स्वं व्रीहिं संयच्छति संयच्छते वा। स्वां गां जानाति जानीते वा॥ इत्यात्मनेपदं॥ शेषात्कर्तरि परस्मै
पदं॥ अत्ति। अनुपराभ्यां कृञः॥ कर्तृगेपि फले गंधनादौ च परस्मैपदार्थमिदं। अनुकरोति। पराकरोति॥ क

र्त्तरीत्येव। भावकर्मणोर्माभूत्॥ नचैवमपिकर्मकर्त्तरिप्रसंगः। कार्यातिदेशपक्षस्यमुख्यतयातत्रकर्मवत्कर्म
णेत्यात्मनेपदेनपरेणास्यबाधात्॥ शास्त्रातिदेशपक्षेतुकर्त्तरिकर्मेत्यतःशेषादित्यतश्चकर्तृग्रहणद्वयम
नुवर्त्यकर्त्रैवयःकर्त्तानतुकर्मकर्त्तातत्रैवेतिव्याख्येयं। अभिप्रत्यतिभ्यःक्षिपः॥ क्षिपप्रेरणे स्वरितेत्। अभि
क्षिपति। प्राद्वहः। प्रवहति। परेर्मृषः॥ परिमृष्यति। तौदादिकस्यतुपरिमृषति। इहपरेरितियोगंविभज्य
वहेरपीतिकेचित्। व्याङ्परिभ्योरमः॥ विरमति। उपाच्च॥ यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः॥ अंतर्भा
वितण्यर्थोयं। विभाषाकर्मकात्॥ उपाद्रमेरकर्मकात्परस्मैपदंवा॥ उपरमत्युपरमतेवा॥ निवर्त्ततइत्य
र्थः॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणेः॥ एभ्योण्यंतेभ्यःपरस्मैपदंस्यात्॥ णिचश्चेत्यस्यापवादः॥ बोध
यतिपद्मं। योधयतिकाष्ठानि। नाशयतिदुःखं॥ जनयतिसुखं॥ अध्यापयतिवेदं॥ प्रावयति प्रापयतीत्यर्थः॥
द्रावयति। विलापयतीत्यर्थः। स्रावयति। स्यंदयतीत्यर्थः। निगरणचलनार्थेभ्यश्च। निगारयति। आशा
यति भोजयतीत्यर्थः। चलयति। कंपयति। अदेःप्रतिषेधः। आदयते देवदत्तेन। गतिबुद्धीतिकर्मत्वंआदि

खाद्योर्नेतिप्रतिषिद्धं। निगरणेतिसूत्रेणप्राप्तस्येवायंनिषेधः॥ शेषात्कर्त्रभिप्रायेपरस्मैपदंस्यादेव॥ आदयत्यन्नं बटु
ना॥ अणावकर्मकाच्चित्तवत्कर्तृकात्॥ ण्यंतात् परस्मैपदंस्यात्। शेतेकृष्णः। गोपीशाययति। नपादम्याङ्यमाङ्य
सपरिमुहरुचिनृतिवदवसः॥ एभ्योण्यंतेभ्यःपरस्मैपदंन। पिबतिर्निगरणार्थः। इतरेचित्तवत्कर्तृकाअकर्मकाः॥
नृतिश्चलनार्थोपि। तेनसूत्रद्वयेनप्राप्तिः॥ पाययते। दमयते। आयामयति। आयासयते। परिमोहयते। रोचयते।
नर्त्तयते। वादयते। वासयते। धेटउपसंख्यानं॥ धापयतेशिशुमेकंसमीची। अकर्त्रभिप्रायेशेषादितिपरस्मैपदंस्या
देव। वत्सान्पाययतिपयः। दमयंतीकमनीयतामदं। भिक्षावासयति। वाक्यषः॥ लोहितायति। लोहितायते। द्युद्भ्योलु
ङि। अद्युतत। अद्योतिष्ट। वृद्भ्यःस्यसनोः॥ वर्त्स्यति। वर्त्तिष्यते। विवृत्सति। विवर्त्तिषते। लुटिचक्लृपः॥ कल्प्तासि। कल्पि
तासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। चिक्लृप्स्यति। चिकल्पिषते। चिक्लृप्सते॥ इतिपदव्यवस्था॥
अथभावकर्मणोर्लडादयः॥ भावकर्मणोरितितङ्। सार्वधातुकेयक्। धातोर्यक्प्रत्ययःस्याद्भावकर्मवाचिनिसार्वधा
तुकेपरे। भावोभावनाउत्पादनाक्रिया। साचधातुत्वेनसकलधातुवाच्या॥ भावार्थलकारेणानूद्यते। युष्मदस्मद्भ्यांस

मानाधिकरण्याभावात्प्रथमपुरुषः॥ तिङ्वाच्यभावनाया असत्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि। किंतु एकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात्॥ अनभिहिते कर्तरि तृतीया॥ त्वया मया अन्यैश्च भूयते। बभूवे। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च॥ उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात् स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च। अयमिट् चिण्वद्भावसंनियोगशिष्टत्वात्तदभावे न। इहार्धधातुक इत्यधिकृतं सीयुटो विशेषणं नेतरेषां। अव्यभिचारात्। चिण्वद्भावाद्वृद्धिः॥ भाविता। भविता। भाविष्यते। भविष्यते। भूयतां। अभूयत। भूयेत। भाविषीष्ट। भविषीष्ट। चिण् भावकर्मणोः॥ च्लेश्चिण् स्याद्भावकर्मवाचिनि तशब्दे परे। अभावि। अभाविष्यत। अभविष्यत। लिङ्न्तत्वात्कर्मणि न द्वितीया॥ अनुभूयते आनन्दश्चैत्रेण। त्वया मया चानुभूयते॥ अनुभूयंते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषातां। अन्वभाविषत। अन्वभविषतां। णिलोपः भाव्यते। भावयांचक्रे। भावयांबभूवे। भावयामासे। इह तशब्दस्य एशि इटएत्वे च कृते हएतीति हत्वं न। तासिसाहचर्याद्दस्तेरपि व्यतिहे इत्यादौ सार्वधातुके एव एति हत्वप्रवृत्तेरि

पि

साहुः। भाविता। चिण्वदिट आभीयत्वेनासिद्धत्वाण्णिलोपः॥ पक्षे भावेता॥ भाविष्यते। भाव्यतां। अभाव्यत। भाव्येत। भाविषीष्ट। अभावि। अभाविषातां। अभावयिषातां। बुभूष्यते। बुभूषांचक्रे। बुभूषिता। बुभूषिष्यते॥ बोभूयते। यङ्लुगन्तात् बोभूयते। बोभवांचक्रे। बोभाविता॥ अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घः। स्तूयते विष्णुः। स्ताविता। स्ताविष्यते॥ अस्तावि। अस्ताविषातां। अस्तोषातां। गुणोर्तीति गुणः। अर्यते। स्मर्यते। सस्मरे। परत्वान्नित्यत्वाच्च गुणे रपरे च कृते अजन्तत्वाभावेऽप्युपदेशग्रहणाच्चिण्वदिट्। आरिता। अर्ता। स्मारिता। स्मर्ता। गुणोर्तीत्यत्र नित्यग्रहणानुवृत्तेरुक्तत्वान्नेह गुणः। संस्क्रियते। अनिदितामिति नलोपः। स्रस्यते। इदित स्तुनंद्यते। संप्रसारणं। इज्यते। अयङ्यि क्ङिति। शय्यते॥ तनोतेर्यकि॥ आकारोन्तादेशो वा स्यात्। तायते तन्यते। ये विभाषा। जायते। जन्यते। तपोऽनुतापे च। तपश्च्लेश्चिण् न स्यात् कर्मकर्तर्यनुतापे च। अन्वतप्त पापेन। पापं कर्तृ तेनाभ्याहत इत्यर्थः। कर्मणि लुङ्। यद्वा पापेन पुंसा कर्त्रा अशोचीत्यर्थः। घुमास्थेतीत्वं। दीयते। धीयते। आदेच उपदेशेऽशितीति कर्मधारयादित्सञ्ज्ञकत्वाकारादौ निषेधः। एत्वाश्चादित्त्वाभावान्नस्मिन्नालं। जग्ले।

नास्तीति विशेषः। ध्यंत ताभावेशम्यते मुनिना नोदात्तोपदेशस्यमान्तस्यानाचमेः। उपधाया वा स्य स्यां
शंशामिता॥ २

सि॰ कौ॰
॥११२॥

आतो युक् चिण्कृतोः ॥ आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च। दायिता। दाता। दायिषीष्ट। दासीष्ट।
अदायि। अदायिषातां। अदिषातां। अधायि। अधायिषातां। अधिषातां। अग्लायि। अग्लायिषातां। अ
ग्लासातां। हन्यते। अचिण्णलोरित्युक्तेर्हनस्तो न। हो हन्तेरिति कुत्वं। घानिता। हंता। घानिष्यते। आशीर्लिङि व
धादेशस्यापवादश्चिण्वद्भावः। आर्धधातुके सीयुटीति विशेषविहितत्वात्। घानिषीष्ट। पक्षे वधिषीष्ट। अघा
नि। अघानिषातां। अहसातां। पक्षे वधादेशः। अवधि। अवधिषातां। अघानिष्यत। अहनिष्यत। न च स्या
दिषु चिण्वदित्यतिदेशात् वधादेशः स्यादिति वाच्यं। अंगस्येत्यधिकारादंगस्यैवातिदेशात्। गृह्यते। चिण्वदि
टो न दीर्घत्वं। प्रकृतस्य वलादिलक्षणस्यैवेटो ग्रहो लिटीत्यनेन दीर्घविधानात्। ग्राहिता। ग्रहीता। ग्राहिष्यते।
ग्रहीष्यते। ग्राहिषीष्ट। ग्रहीषीष्ट। अग्राहि। अग्राहिषातां। अग्रहीषातां। दृश्यते। अदर्शि। अदर्शिषातां।
सिचः कित्वादृक्ष। अदृक्षातां। गिरतेर्लुङि ध्वमि चतुरधिकं शतं। तथाहि। चिण्वदिटो दीर्घो नेत्युक्तं। अग
रिध्वं। द्वितीये त्विटि वृतो वेति वा दीर्घः। अगरिध्वं। अगरीध्वं। एषां त्रयाणां लत्वढत्वद्वित्वत्रयं चेति पंचवे

कल्पिकानि। इत्थं षण्णवतिः। लिङ्सिचोरिति विकल्पादिड्भावे ऊश्चेति कित्वं। इत्वं। रपरत्वं हलि चेति दी
र्घः। इणः षीध्वमिति नित्यं ढत्वं। अगीढ्वं। ढत्वमानां द्वित्वविकल्पेऽष्टौ। उक्तषण्णवत्या सह संकलनेन उ
क्ता संख्येति। इट् दीर्घश्चिण्वदिट् लत्वढत्वे द्वित्वत्रिकं तथा॥ इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतं॥ हेतुम
ण्यंतात्कर्मणि लः यक् णिलोपः॥ शम्यते मोहो मुकुंदेन॥ चिण्णमुलोर्दीर्घोऽन्यतरस्यां॥ चिण्परे णमुल्परे च
णौ मितामुपधाया दीर्घो वा स्यात्॥ प्रकृतो मितां ह्रस्व एव न तु विकल्पितः॥ ण्यंतात् णेर्ह्रस्वविकल्पस्यासिद्धः॥
दीर्घविधौ हि णिचो लोपेन स्थानिवदिति दीर्घः। सिध्यति। ह्रस्वविधौ हि स्थानिवत्त्वं दुर्वारं॥ भाष्ये तु पूर्वत्रासिद्धे
सिद्धेन स्थानिवदित्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चर्विधयः प्रत्याख्याताः॥ णाविति जातपरो निर्दे
शः। दीर्घग्रहणं चेदं मास्त्विति तदाशयः। शामिता। शमिता। शमयिता। शामिष्यते। शमिष्यते। शमयिष्यते।
यङ्ताण्णिचू। शंशम्यते। शंशामिता। शंशमयिता। यङ्लुगंतात् णिचि अपि एवं। भाष्यमते तु यङंताच्चिण्वदिटि दीर्घो
नास्तीति विशेषः। ण्यंतत्वाभावे शम्यते मुनिना नोदात्तोपदेशस्य मान्तस्यानाचमेः। उपधाया वृद्धिर्मेस्याच्चि

शंशामिता॥२

णिज्णितिकृतिच। अशामि। अदमि। उदात्तोपदेशस्येतिकिं। अगामि। मांतस्यकिं। अवादि। अनाचमेः किं। आचा
मि। अनाचमिकमिवमीनामितिवक्तव्यं। आयादयइतिणिङभावे। अकामि। णिङ्णिचोरप्येवं। अवामि। वधहिंसा
यांहलंतः। जनिवध्योश्चेतिनवृद्धिः। अवधि। जाग्रोविचिण्णल्ङित्स्वितियुक्तेर्नगुणः। अजागारि। भंजेश्चचिणि॥ न
लोपोवास्यात्। अभाजि। अभंजि। विभाषाचिण्णमुलोः॥ लभेर्नुमागमोवास्यात्॥ अलंभि। अलाभि। व्यवस्थित
विकल्पात्प्रादेर्नित्यंनुम्। प्रालंभि। द्विकर्मकाणांतु गौणेकर्मणिदुह्यादेःप्रधानेनीहृकृषवहां। बुद्धिभक्षार्थयोः
शब्दकर्मकाणांनिजेच्छया॥ १॥ प्रयोज्यकर्मण्यन्येषांण्यंतानांलादयोमताः॥ गौर्दुह्यतेपयः। अजाग्रामंनीयते।
क्रियते। कृष्यते। ऊह्यते। बोध्यते। माणवकंधर्मः माणवकोधर्ममितिवा। देवदत्तोग्रामंगम्यते। अकर्मकाणांका
लादिकर्मकाणांकर्मणिभावेचलकारइष्यते। मासोमासंवाआस्यतेदेवदत्तेन। णिजंतानुप्रयोज्येप्रत्ययः। मा
समास्यतेमाणवकः॥ इतिभावकर्मप्रक्रिया॥ यदासौकर्यातिशयंद्योतितुंकर्तृव्यापारोनविवक्ष्यतेतदा
कारकांतराण्यपिकर्तृसंज्ञांलभंतेस्वव्यापारेस्वतंत्रत्वात्। तेनपूर्वंकरणत्वादिसत्त्वेपिसंप्रतिकर्तृत्वात्कर्तरि

लकाराः। साध्वसिश्छिनत्ति। काष्ठानिपचंति। स्थालीपचति। कर्मणस्तुकर्तृत्वविवक्षायांप्राक्सकर्मकाअपिप्रायेणाकर्म
काः तेभ्योभावेकर्तरिचलकाराः। पच्यतेओदनेन। भिद्यतेकाष्ठेन। कर्तरितु॥ कर्मवत्कर्मणातुल्यक्रियः॥ कर्मस्थयाक्रिय
यातुल्यक्रियःकर्ताकर्मवत्स्यात्॥ कार्यातिदेशोयं। तेनयगात्मनेपदंचिण्वदिटः स्युः कर्तुरभिहितत्वात्प्रथमा। पच्यतेओ
दनः। भिद्यतेकाष्ठं। अपाचि। अभेदि। नन्वेवंभावेलकारेकर्तुर्द्वितीयास्यात्॥ अस्मादेवातिदेशादितिचेन्न॥ लकारवाच्य
एवकर्ताकर्मवत्स्यात्। लिङ्याशिष्यङितिद्विलकाल्ल इत्यनुवृत्तेः। भावेप्रत्ययेचकर्तुर्लकारेणानुपस्थितेः। अतएवकृत्
त्यखलर्थाःकर्तरिनभवंति। किंतुभावेएव। भेत्तव्यंकुसूलेन। ननुपचिभिद्योःकर्मस्थक्रियाविक्लित्तिर्द्विधाभवनंचासै
वेदानींकर्तृस्थानतुतत्तुल्या। सत्यं। कर्मत्वकर्तृत्वावस्थाभेदोपाधिकंतत्समानाधिकरणक्रियाभेदमाश्रित्यव्यवहारः। क
र्मणेतिकिं। करणाधिकरणाभ्यांतुल्यक्रियेपूर्वोक्तेसाध्वसिरित्यादौमाभूत्॥ किंचकर्तृस्थक्रियेभ्योमाभूत्। गच्छति
ग्रामः। आरोहतिहस्ती। अधिगच्छतिशास्त्रार्थः। स्मरतिश्रद्दधातिच। यत्रकर्मणिक्रियाकृतोविशेषोदृश्यते। यथापक्वेषु
तंडुलेषुयथावाछिन्नेषुकाष्ठेषुतत्रकर्मस्थानेतरत्र। नहिपक्वापक्वतंडुलेष्विवगतागतग्रामेषुवैलक्षण्यमुपलभ्यते।
करोतिरुत्पादनार्थः। उत्पत्तिश्चकर्मस्था। कारिष्यतेघटइत्यादि। यत्नार्थत्वेतुनेतत्सिध्येत्। ज्ञानेच्छादिवद्यत्नस्यकर्तृ

स्थत्वात्॥ एतेनानुव्यवस्यमानेर्थे इति व्याख्यातं। कर्तृस्थत्वेन यगभावात्॥ इयनि कृते आलोपे च कृते रूपसिद्धेः॥ ताच्छील्या
दावयं चानश्‌ इत्यात्मनेपदं। सकर्मकाणां प्रतिषेधो वक्तव्यः। अन्योन्यं स्पृशतः। अजा ग्रामं नयति। दुहिपच्योर्बहुलं सक
र्मकयोरिति वाच्यं॥ न दुहस्नुनमां यक्चिणौ॥ एभ्यः कर्मकर्तरि यक्चिणौ न स्तः॥ दुहेरनेन यक एव निषेधः। चिण्
तु विकल्पेनेष्यते। शप्लुक्। गौः पयो दुग्धे। अचः कर्मकर्तरि। अजन्तात् च्लेश्चिण् वा स्यात् कर्मकर्तरि तशब्दे परे।
अकारि। अकृत। दुहश्च। अदोहि। पक्षे क्सः। लुग्वेति पक्षे लुक्। अदुग्ध। अधुक्षत। उदुंबराः फलं पच्यन्ते। सृजि य
ज्योः श्यंस्तु॥ अनयोः सकर्मकयोः कर्ता बहुलं कर्मवत् यगपवादश्च श्यन् वाच्य इत्यर्थः॥ सृजेः श्रद्धोपपन्ने क
र्तर्येवेति वाच्यं॥ सृज्यते स्रजं भक्तः। श्रद्धया निष्पादयतीत्यर्थः॥ असर्जि। युज्यते ब्रह्मचारी योगं॥ भूषाकर्मकि
रादिसनां चान्यत्रात्मनेपदात्। भूषावाचिनां किरादिसन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः।
अलंकुरुते कन्या। अलमकृत। अवकिरते हस्ती। अवाकीर्ष्ट। गिरते। अगीर्ष्ट। आद्रियते। आदृत। किरादिस्तु
दाद्यन्तर्गणः। चिकीर्षते कटः। अचिकीर्ष्ट। इच्छायाः कर्तृस्थत्वे पि करोति क्रियापेक्षमिह कर्मस्थक्रियत्वं। न रु

धः। अस्मात् च्लेश्चिण् न। अवारुद्ध गौः कर्मकर्तरीत्येव। अवारोधि गौर्गोपेन। तपस्तपःकर्मकस्यैव॥ कर्ता कर्मवत् स्यात्॥ विध्य
र्थमिदं। एवकारस्तु व्यर्थ एवेति वृत्त्यनुसारिणः॥ तप्यते तपस्तापसः। अर्जयतीत्यर्थः। तपो नुतापे चेति चिण्निषेधात् सिच्॥
अतप्त। तपःकर्मकस्येति किं। उत्तपति सुवर्णं सुवर्णकारः। न दुहस्नुनमां यक्चिणौ॥ प्रस्नुते। प्रास्नाविष्ट। प्रास्नोष्ट। नमते
दण्डः। अनंस्त। अन्तर्भावितण्यर्थोत्र नमिः। यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं। कारयते। अचीकरत।
उच्छ्रयते दण्डः। उदशिश्रियत। चिण्वदिट् तु स्यादेव। कारिष्यते। उच्छ्रायिष्यते। ब्रूते कथा। अवोचत। भारद्वाजीयाः पठन्ति॥ णि
श्रन्थिग्रन्थिब्रूञामात्मनेपदाकर्मकाणामुपसंख्यानं। पुच्छमुदस्यति उत्पुच्छयते गौः॥ अन्तर्भावितण्यर्थतायां उत्पुच्छयते गां।
पुनः कर्तृत्वविवक्षायां उत्पुच्छयते गौः। उदपुपुच्छत। यक्चिणोः प्रतिषेधात् शप् चङ् च। श्रन्थिग्रन्थ्योराधृषीयात्वाण्णिजभा
वपक्षे ग्रहणं। ग्रन्थति ग्रन्थं। श्रन्थति मेखलां देवदत्तः। ग्रन्थते ग्रन्थः। अग्रन्थिष्ट। श्रन्थते। अश्रन्थिष्ट। क्र्यादिकयोस्तु श्रथ्नी
ते। ग्रथ्नीते स्वयमेव। विकुर्वते सैन्धवाः। वल्गन्तीत्यर्थः। वेः शब्दकर्मणो ऽकर्मकाच्चेति तङ्। अन्तर्भावितण्यर्थस्य पुनः प्रेषण
त्यागे विकुर्वते सैन्धवाः॥ व्यकारिष्ट। व्यकारिषातां। व्यकारिषत। व्यकृत। व्यकृषातां। कुषिरजोः प्राचां श्यन् परस्मैपदं च॥ अ

अनयोःकर्मकर्तरिश्यन्किंतुश्यन्परस्मैपदंच। आत्मनेपदस्यापवादः। रज्यतिरज्यतेवस्त्रं। यगविषयेतुनास्यप्रवृत्तिः। कोषिषीष्ट।
रुक्षीष्ट॥ इतिकर्मकर्तृप्रक्रिया॥ अभिज्ञावचनेलृट्। स्मृतिबोधिन्युपपदेभूतानद्यतनेधातोर्लृट्स्यात्। लङोपवादः। स्मरसि
कृष्णगोकुलेवत्स्यामः। एवंबुध्यसेचेतयसेइत्यादियोगेपि। तेषामपिप्रकरणादिवशेनस्मृतौवृत्तिसंभवात्। नयदि। यद्योगे
उक्तंन। अभिजानासिकृष्णयद्वनेअभुंज्महि। विभाषासाकांक्षे॥ उक्तविषयेलृड्वास्यात्। लक्ष्यलक्षणभावेनसाकांक्षश्चेद्धा
त्वर्थः। स्मरसिकृष्णवनेवत्स्यामः। तत्रगाश्चारयिष्यामः। वासोलक्षणंचारणंलक्ष्यं। पक्षेलङ्। यच्छब्दयोगेपिनयदीतिबाधि
त्वापरत्वाद्विकल्पः। परोक्षेलिट्॥ चकार। उत्तमपुरुषेचित्तविक्षेपादिनापारोक्ष्यं। सुप्तोहंकिलविललाप। बहुजगादपुरस्तात्त
स्यमत्ताकिलाहं। अत्यंतापह्नवेलिड्वक्तव्यः। कलिंगेष्ववात्सीः। नाहंकलिंगाञ्जगाम। हशश्वतोर्लङ्च॥ अनयोरुपपदयो
र्लिड्विषयेलङ्स्याच्चाल्लिट्। इतिहाकरोच्चकारवा। शश्वदकरोच्चकारवा॥ प्रश्नेचासन्नकाले। प्रष्टव्यःप्रश्नः। आसन्नकाले
पृच्छ्यमानेर्थेलिड्विषयेलङ्लिटौस्तः। अगच्छत्किं। जगामकिं। अनासन्नेतुकंसंजघानकिं। लट्स्मे॥ लिटोपवादः। यज
तिस्मयुधिष्ठिरः। अपरोक्षेच॥ भूतानद्यतनेलट्स्यात्स्मयोगे। एवंस्मपिताब्रवीति। ननौपृष्टप्रतिवचने॥ अनद्यतनपरो

क्षइतिनिवृत्तं॥ भूतेलट्स्यात्॥ अकार्षीःकिं। ननुकरोमिभोः। नन्वोर्विभाषा॥ नकरोमि। नाकार्षं। अहंनुकरोमि। अहंन्वकार्षं।
पुरिलुङ्चास्मे॥ अनद्यतनग्रहणंमंडूकप्लुत्यानुवर्तते। पुराशब्दयोगेभूतानद्यतनेविभाषालुङ्चाल्लट्। नतुस्मयोगे। पक्षेय
थाप्राप्तं। वसतीहपुराछात्राः। अवात्सुः। अवसन्। ऊषुर्वा। अस्मेकिं। जयतिस्मपुरा। भविष्यतीत्यनुवर्त्तमाने। यावत्पुरा
निपातयोर्लट्॥ यावद्भुंक्ते। पुराभुंक्ते। निपातावेतौनिश्चयंद्योतयतः। निपातयोःकिं। यावद्दास्यतेतावद्भोक्ष्यते। करणभू
तयापुरायास्यति। विभाषाकदाकर्ह्योः॥ भविष्यतिलट्स्यात्॥ कदाकर्हिवाभुंक्तेभोक्ष्यतेभोक्तावा। किंवृत्तेलिप्सायां॥ भ
विष्यतिलड्वास्यात्। कंकतरंकतमंवाभोजयसि। भोजयिष्यसि। भोजयितासिवा। लिप्सायांकिं। कःपाटलिपुत्रंगमिष्य
ति। लिप्स्यमानसिद्धौच। लिप्स्यमानेनान्नादिनास्वर्गादेःसिद्धौगम्यमानायांभविष्यतिलड्वास्यात्। योन्नंददातिदास्यतिदातावा।
सस्वर्गंयातियास्यतियातावा। लोडर्थलक्षणेच॥ लोडर्थःप्रैषादिर्लक्ष्यतेयेनतस्मिन्नर्थेवर्त्तमानाद्धातोर्भविष्यतिलड्वास्यात्।
कृष्णश्चेद्भुंक्तेत्वंगाश्चारय। पक्षेलुट्लृटौ। लिङ्चोर्ध्वमौहूर्तिके॥ ऊर्ध्वंमुहूर्त्ताद्भवऊर्ध्वमौहूर्तिकः। निपातनात्समासः। उ
त्तरपदवृद्धिश्च। ऊर्ध्वमौहूर्तिके। भविष्यतिलोडर्थलक्षणेवर्तमानाद्धातोर्लिङ्लटौवास्तः। मुहूर्त्तादुपरिउपाध्याय

कदागतोऽसि आगच्छति आगमिष्यति आगंता वा॥ अथ त्वं कदाधीषे। वर्त्तमानसामीप्ये वर्त्तमानवद्वा॥ समीपमेव सामीप्यं। स्वार्थे
ष्यञ्॥ वर्त्तमाने लडित्यारभ्य उणादयो बहुलमिति यावत् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्त्तमानसमीपे भूते भविष्यति च वा
स्युः॥ कदागतोऽसि। अयमागच्छामि। अयमागमं। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा। आशंसायां भूतवच्च॥ वर्त्तमानसामी
प्य इति नानुवर्त्तते। भविष्यति काले भूतवद्वर्त्तमानवच्च प्रत्यया वा स्युराशंसायां॥ देवश्चेद्वर्षीत् वर्षति वर्षिष्यति वा। धान्यमवा
प्स्म वपाम। वप्स्यामो वा। सामान्यातिदेशे विशेषानतिदेशः। तेन लङ्लिटौ न। क्षिप्रवचने लृट्॥ क्षिप्रपर्याये उपपदे पूर्वविष
ये लृट् स्यात्॥ वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा यास्यति। शीघ्रं वप्स्यामः। नेति वक्तव्ये लृड्ग्रहणं लुटोऽपि विषये यथा स्यात्॥
श्वः शीघ्रं वप्स्यामः। आशंसावचने लिङ्। आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न भूतवत्॥ गुरुश्चेदुपेयादाशंसे
ऽधीयीय। आशंसे क्षिप्रमधीयीय। नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः॥ क्रियायाः सातत्ये सामीप्ये च गम्ये लङ्लुटौ न।
यावज्जीवमन्नमदाद्दास्यति दाता वा॥ सामीप्यं तुल्यजातीयेनाव्यवधानं। येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधीत। सोमे
नायष्ट। येयममावास्याऽऽगामिनी तस्यामग्नीनाधास्यते। सोमेन यक्ष्यते। भविष्यति मर्यादावचनेऽवरस्मिन्। भविष्यति काले

मर्यादोक्तावरस्मिन् प्रविभागेऽनद्यतनवन्न। योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून् पास्यामः॥
कालविभागे चानहोरात्राणां॥ पूर्वसूत्रं सर्वमनुवर्त्तते॥ अहोरात्रसंबंधिनि विभागे प्रतिषेधार्थमिदं। योगविभाग उत्तरार्थः। योऽयं
वत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे। अनहोरात्राणां किं। योऽयं मास आगामी तस्य योऽवरः पं
चदशरात्रः तत्राध्येतास्महे। परस्मिन्विभाषा॥ अवरस्मिन्वर्ज्जं पूर्वसूत्रद्वयमनुवर्त्तते। अप्राप्तविभाषेयं। योऽयं संवत्सर आगा
मी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे। अध्येतास्महे। लिङ्निमित्ते लृङ् क्रियातिपत्तौ॥ भविष्यतीत्येव। स्वश्चेत् स्वश्चे
द्भविष्यत्तदा सुभिक्षमभविष्यत्। भूते च॥ पूर्वसूत्रं सर्वमनुवर्त्तते। वोताप्योः॥ वा आ उताप्योः॥ उताप्योरित्यतः प्राक् भू
ते लिङ्निमित्ते लृङ् वेत्यनुवर्त्तते। पूर्वसूत्रं तु उताप्योरित्यादौ प्रवर्त्तत इति विवेकः॥ गर्हायां लडपिजात्वोः॥ आभ्यां योगे लट्
स्यात्कालत्रये गर्हायां॥ लुङादीन् परत्वादयं बाधते। अपि जायां त्यजसि जातु गणिकामाधत्से गर्हितमेतत्। विभाषा कथमि
लिङ् च। गर्हायामित्येव। कालत्रये लिङ् वा लट्। कथं धर्मं त्यजेः त्यजसि वा। पक्षे कालत्रये लकाराः। अत्र भविष्यति नित्यं लृ
ङ् भूते वा। कथं नाम तत्र भवान् धर्ममत्यक्ष्यत्। किंवृत्ते लिङ्लृटौ॥ गर्हायामित्येव। विभाषा तु नानुवर्त्तते। कः कतरः

कतमोवाहरिंनिंदेत्। निंदिष्यतिवा। लृङ्प्राग्वत्। अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। गर्हायामितिनिवृत्तं। अनवक्लृप्तिरसंभा
वना। अमर्षोक्षमा। नसंभावयामिनमर्षयेवा। भवान्हरिंनिंदेत्। निंदिष्यतिवा। कःकतरोवाहरिंनिंदेत्निंदिष्यतिवा।
लृङ्प्राग्वत्। किंकिलास्त्यर्थेषुलृट्। अनवक्लृप्त्यमर्षयोरित्येततगर्हायांचेतियावदनुवर्त्तते। किंकिलेतिसमुदायःक्रो
धद्योतकः। उपपदं। अस्त्यर्थाः अस्तिभवतिविद्यतयः। लिङोपवादः। नश्रद्दधेनमर्षयेवा किंकिलत्वं शूद्रान्नंभोक्ष्यसे।
अस्तिभवतिविद्यतेवा। शूद्रोगमिष्यसि। अत्रलृङ्न। जातुयदोर्लिङ्॥ यदायद्योरुपसंख्यानं। लृटोपवादः। जातुयत्
यदायदिवात्वादृशोहरिंनिंदेत्। नावकल्पयामिनमर्षयामि। लृङ्प्राग्वत्। यच्चयत्रयोः॥ यच्चयत्रवात्वमेवंकुर्याः। नश्र
द्दधेनमर्षयामि। गर्हायांच। अनवक्लृप्त्यमर्षयोरितिनिवृत्तं। यच्चयत्रयोर्योगेगर्हायांलिङेवस्यात्। यच्चयत्रवात्वं
शूद्रंयाजयेः। अन्याय्यंतत्। चित्रीकरणेच। यच्चयत्रवात्वंशूद्रंयाजयेः आश्चर्यमेतत्। शेषेलृडयदौ॥ यच्चयत्राभ्या
मन्यस्मिन्नुपपदेचित्रीकरणेगम्येधातोर्लृट्स्यात्। आश्चर्यमंधोनामकृष्णंद्रक्ष्यति। अयदौकिं। आश्चर्यंयदिसोऽ
धीयीत। उताप्योःसमर्थयोर्लिङ्। बाढमित्यर्थेअनयोस्तुल्यार्थता। उतअपिवाहन्यादवद्यंहरिः। समर्थयोःकिं॥

उतदंडःपतिष्यति। अपिधास्यतिद्वारं। अपिःप्रच्छादनंचगम्यते। इतःप्रभृतिलिङ्निमित्तेक्रियायाअनिष्पत्तौभूतेपिनित्योलृङ्। काम
प्रवेदनेकच्चिति॥ स्वाभिप्रायाविष्करणेगम्यमानेलिङ्स्यान्नतुकच्चिति॥ कामोमेभुंजीतभवान्। अकच्चितीतिकिं। कच्चिज्जीवति।
संभावनेलमितिचेत्सिद्धाप्रयोगे॥ अलमर्थोत्रप्रौढिः। संभावनमितिअलमितिचप्रथमयासप्तम्याचविपरिणम्यते। संभावनेर्थे
लिङ्स्यात्तच्चेत्संभावनमलमर्थेसिद्धार्थप्रयोगेअसति। अपिगिरिंशिरसाभिंद्यात्। सिद्धाप्रयोगेकिं। अलंकृष्णोहस्तिनंहनि
ष्यति। विभाषाधातौसंभावनवचनेयदि॥ पूर्वसूत्रमनुवर्त्तते। संभावनेर्थेधातावुपपदेउक्तेर्थेलिङ्वास्यात्नतुयच्छब्दयोगेपू
र्वेणनित्येप्राप्तेवचनं। संभावयामिभुंजीतभोक्ष्यतेवाभवान्। अयदिकिं। संभावयामियद्भुंजीथास्त्वं। हेतुहेतुमतोर्लिङ्॥ वास्या
त्। कृष्णंनमेच्चेत्सुखंयायात्। कृष्णंनंस्यतिचेत्सुखंयास्यति। भविष्यत्येवेष्यते। नेह हंतीतिपलायते। इच्छार्थेषुलिङ्लोटौ।
इच्छामिभुंजीतभुंक्तांवाभवान्। एवंकामयेप्रार्थयेइत्यादिबोध्यं॥ कामप्रवेदनेइतिवक्तव्यं॥ नेह इच्छन्करोति। लिङ्च॥ समान
कर्तृकेषुइच्छार्थेषुउपपदेषुलिङ्स्यात् भुंजीयेतीच्छति। इच्छार्थेभ्योविभाषावर्त्तमाने। लिङ्स्यात् पक्षेलट्। इच्छेत् इच्छति का
मयेत। कामयते। विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषुलिङ्॥ इतिलिङ्। विधौ यजेत। निमंत्रणे इह भुंजीतभ

यूयमधीध्वे। समुच्चयेतुसक्तून्पिबधा

वान्। आमंत्रणे इहासीत। अधीष्टे पुत्रमध्यापयेद्भवान्॥ संप्रश्ने। किंभोवेदमधीयीयउततर्कं। प्रार्थने। भोजनंलभेय। एवं
लोट्॥ प्रैषातिसर्गप्राप्तकालेषुकृत्याश्च। प्रैषोविधिः। अतिसर्गः कामचारानुज्ञा। भवतायष्टव्यं। भवान्यजतां। चकारेणलो
येनुकर्षणं। प्राप्तकालार्थं। लिङ्चोर्ध्वमौहूर्तिके॥ प्रैषादयोनुवर्त्तते। मुहूर्तादूर्ध्वंयजेत्। यजतां। यष्टव्यं। स्मेलोट्॥ पूर्वसूत्र
विषये॥ लिङः कृत्यानांचापवादः॥ ऊर्ध्वंमुहूर्त्ताद्यजतांस्म। अधीष्टेच॥ स्मेउपपदेअधीष्टेलोट्स्यात्॥ त्वंस्मअध्यापय। लि
ङ्यदि। यच्छब्देउपपदेकालसमयवेलासुचलिङ्स्यात्॥ कालःसमयोवेलावायद्भुञ्जीतभवान्॥ अर्हेकृत्यतृचश्च॥ चा
ल्लिङ्॥ त्वंकन्यांवहेः॥ शकिलिङ्च॥ शक्तोलिङ्स्याच्चात्कृत्याः॥ भारंत्वंवहेः॥ माङिलुङ्॥ माकार्षीः। कथंमाभवतु। माभूदिष्य॥ नीति
नायंमाङ्किंतुमाशब्दः॥ धातुसंबंधेप्रत्ययाः॥ धात्वर्थानांसंबंधेयत्रकालेप्रत्ययाउक्तास्ततोन्यत्रापिस्युः॥ तिङंतवाच्य
क्रियायाःप्राधान्यात्तदनुरोधेनगुणभूतक्रियावाचिभ्यःप्रत्ययाः। वसन्ददर्श॥ भूतेलट्। अतीतवा। सकर्त्तृकर्त्तृकंदर्श
नमर्थः॥ सोमयाज्यस्यपुत्रोभविता। सोमेनयक्ष्यमाणोयःपुत्रस्तत्कर्त्तृकंभवनं॥ क्रियासमभिहारेलोट्लोटोहिस्वौवा
चतध्वमोः॥ पौनःपुन्यंभृशार्थश्चद्योत्येधातोर्लोट्स्यात्। तस्यचहिस्वौस्तः। तिङामपवादः॥ तौचहिस्वौक्रमेणपर

स्मैपदात्मनेपदसंज्ञौस्तः तिङ्संज्ञौच॥ तध्वमोर्विषयेहिस्वौवास्तः॥ पुरुषवचनसंज्ञेतुनानयोरतिदिश्येते
हिस्वविधानसामर्थ्यात्॥ तेनसकलपुरुषवचनविषयेपरस्मैपदिभ्योहिः कर्त्तरि॥ आत्मनेपदिभ्यः स्वोभा
वकर्मकर्तृषु॥ समुच्चयेन्यतरस्यां॥ अनेकक्रियासमुच्चयेद्योत्येप्रागुक्तंवास्यात्॥ यथाविध्यनुप्रयोगः
पूर्वस्मिन्॥ आद्येलोड्विधानेलोट्प्रकृतिभूतएवधातुरनुप्रयोज्यः॥ समुच्चयेसामान्यवचनस्य॥ समुच्च
येलोड्विधौसामान्यार्थस्यधातोरनुप्रयोगः॥ अनुप्रयोगाद्यथायथंलडादयस्तिबादयश्च॥ ततःसंबध्या
कालयोःपुरुषविशेषार्थस्यचाभिव्यक्तिः॥ क्रियासमभिहारेद्वेवाच्ये॥ याहियाहीतियाति॥ पुनःपुनरति
शयेनवायानंह्यंतस्यार्थः॥ वएककर्त्तृवर्त्तमानंयानंयातीत्यस्य॥ इतिशब्दस्त्वभेदान्वयेतात्पर्यंग्राहयति
एवंयातः। यांति। यासि। याथः याथ। यातयातेतियूयंयाथ। याहियाहीतिअयासीत्। यास्यतिवा॥
अधीष्वाधीष्वेत्यधीते। ध्वंविषयेपक्षेअधीध्वमधीध्वमितियूयमधीध्वे। समुच्चयेतुसक्तून्पिबधा

नाः खादेत्यभ्यवहरति। अन्नं भुंक्ष्व दधिकमास्वादस्वेत्यभ्यवहरते। धानाः खादतेत्यभ्यवहरत। भुंग्ध्व
मास्वादध्वमित्यभ्यवहरध्वे। तत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः। पक्षे सक्तून्
पिबति धानाः खादति। अन्नं भुंक्ते दधिकमास्वादते। एतेन पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरां
गनाः। विग्रह्य चक्रे नमुचिद्विषा बलीय इत्थमस्वास्थ्यमहर्दिवं दिवः इति व्याख्यातं। अवस्कंदनलवनादिरूपाभू
तानद्यतनपरोक्षा एककर्तृका अस्वास्थ्यक्रियेत्यर्थात्। इह पुनः पुनश्चवस्कंदेत्यादिरर्थ इति तु व्याख्यानं भ्रममू
लकमेव। द्वितीयसूत्रे क्रियासमभिहारे इत्यस्यानुवृत्तेः। लोडंतस्य द्वित्वापत्तेश्च। पुरीमवस्कंदेत्यादि मध्यमपुरु
षैकवचनमित्यपि केषांचिद्भ्रम एव। पुरुषवचनसंज्ञे तु नेत्युक्तत्वात्॥ ॥ इति लकारार्थप्रक्रिया॥ ॥ इति श्री
भट्टोजीदीक्षितविरचितायां सिद्धांतकौमुद्यां तिङंतं समाप्तं॥ ॥ श्रीकृष्णार्पणमस्तु॥ ॥ शुभं भवतु॥